17-18(1) 18-19(6)

# SEMUSHI
# शेमुषी

Volume - XIV /ISSUE - 2 *Bi-monthly News Letter* May-Nov-2018

**वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम।**
**स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा।। (ऋग्वेद: १०.८१.७)**

***Let us, this day, invoke for our protection the Lord of Speech, the Creator of all, who is swift as thought; may He, the Bestower of all happiness, the doer of good works, be propitiated by all our oblations, (so as) to grant us his protection. (Rgveda 10.81.7)***



## राष्ट्रियसंस्कृतविद्यापीठम् : : तिरुपति:
## RASHTRIYA SANSKRIT VIDYAPEETHA

**(Deemed to be University)**
**Accredited with CGPA of 3.71 on 4 point scale by NAAC (Cycle-2)**
**Categorized in 1st Category among Indian Deemed Universities by the UGC**
**Tirupati, Andhra Pradesh**
**PIN - 517 507**

## महामान्यकुलाधिपतीनां स्वागतम्



विद्यापीठस्य कुलपतिभिः आचार्य वि.मुरलीधरशर्ममहाभागैः, कुलसचिवैश्च गुल्लपल्लीश्रीरामकृष्णमूर्त्तिमहाभागैः विद्यापीठं प्रति समागमसन्दर्भे कुसुमस्तबकैः स्वागतीक्रियन्ते महामान्याः कुलाधिपतयः पद्मभूषणाः **श्री एन्.गोपालस्वामीमहाभागाः**

## मिथिलाविभूतिसम्माननम्




विद्यापीठस्य ज्योतिषविभागस्य आचार्याः भूतपूर्वकुलसचिवाः आचार्य **राधाकान्तठाकुरमहोदयाः** संस्कृतसाहित्यं प्रति तेषां महदवदानहेतोः विहारराज्ये दरभङ्गानगरस्थश्रीविद्यापतिसेवासंस्थानात् २३/०९/२०१८ तमे दिनाङ्के **मिथिलाविभूतिसम्मानेन** पुरस्क्रियन्ते ।

**शुभसन्दर्भेऽस्मिन् विद्यापीठपक्षतः तेभ्यः अभिनन्दनानि ।**

## श्रीवेङ्कटेश्वरवैदिकविश्वविद्यालये अस्मदाचार्याः कुलपतयः

तिरुपतिस्थश्रीवेङ्कटेश्वरवेदविश्वविद्यालये अस्मद्विद्यापीठस्य साहित्यविभागाचार्याः **आचार्य सन्निधानं सुदर्शनशर्ममहोदयाः** तृतीयवारं कुलपतित्वेन नवम्बरमासान्ते नियुक्ताः सन्ति । अवधेयमिदं यद् इमे राज्यस्तरीयवेदविश्वविद्यालयस्यास्य प्रतिष्ठापककुलपतित्वेन षड्वर्षाणि यावत् तत्र कार्यं कुर्वन्तः विश्वविद्यालयस्य बहुविधामुन्नतिं साधितवन्तः । तेषां तत्र पुनर्नियुक्तिहेतोः विद्यापीठस्य महद्गौरवमभिवर्धितमस्ति ।

**शुभसन्दर्भेऽस्मिन् विद्यापीठपक्षतः तेभ्यो हार्दानि शुभाभिनन्दनानि विज्ञाप्यन्ते ।**



## विद्यापीठे नवकुलसचिवनियुक्तिः



विद्यापीठस्य साहित्यविभागाचार्याः श्रीवेङ्कटेश्वरवेदविश्वविद्यालयस्य भूतपूर्वकुलसचिवाः **आचार्याः गुल्लपल्लीश्रीरामकृष्णमूर्त्तिमहोदयाः** विद्यापीठस्य प्रभारिकुलसचिवत्वेन 29.06.2018 तमे दिनाङ्के नियुक्ताः ।

**विद्यापीठपक्षतः तेभ्यो हार्दानि शुभाभिनन्दनानि आविष्क्रियन्ते ।**

**अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृधुः सौभगाय ।**
**(There is nobody high or low. All are like good brothers working together for prosperity)**





## कुलपतीनां लेखनीतः ..

शिक्षणसंस्थानां विश्वविद्यालयानां वा सामाजिकम् उत्तरदायित्वम् अस्तीति को न वेत्ति ? समाजेन विविधरीतिभिः विश्वविद्यालयाः पोष्यन्ते । अतो हेतोः **"कृते च प्रतिकर्तव्यमेष धर्मस्सनातनः"** इति नियममनुसरन्तः विश्वविद्यालया अपि स्वशैक्षिकवैशद्यानुभवादिना समाजस्य सर्वतोमुखविकासाय नियततया प्रयतेरन् । विश्वविद्यालयानुदानायोगः, राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदादिविश्वविद्यालयसम्बद्धाः संस्थाः विश्वविद्यालयानुष्ठितानां नानासामाजिक- हितसम्बद्धक्रियाकलापानां महत्त्वं गणयन्त्यः तदर्थं विशेषाङ्कस्तरादीन् प्रयच्छन्ति ।

संस्कृतविश्वविद्यालयाः संस्कृतशिक्षणसंस्थाश्च समाजहितकार्येषु आत्मानं व्यापारयन्तः इतोऽधिकं सामाजिकीमुन्नतिम् अधिगच्छेयुः । संस्कृतभाषा-योग-धर्मबोध-देवालयसंस्कृति-ज्योतिष-कर्मकाण्ड-वास्त्वादि-विविधरङ्गेषु सामाजिकानां प्रशिक्षणदानेन इमे सामाजिकीं सेवां सातत्येन विदधानाः स्वीयं नैतिकमुत्तरदायित्वं निर्वहेयुः । अनेन नैके लाभाः प्राप्यन्ते । समाजे संस्कृतविश्वविद्यालयस्य प्रतिष्ठा समभिवर्धते, संस्कृतस्य तन्निष्ठशास्त्राणाञ्च अध्येतृच्छात्रसंख्या च समेधते, मूल्याङ्कने संस्थायाः शैक्षणिकस्तरोऽभिवर्धते, प्रथितयशस्कानां भद्रपुरुषाणां सामाजिकानां संस्थानाञ्च विश्वविद्यालयविकासे योगदानं प्राप्तुमपि शक्यते ।

अदो विद्यापीठं गतवर्षद्वयात् परितः परिवृते समाजे संस्कृतभाषा-देवालयसंस्कृति-शिक्षण-योग-प्रशिक्षणादिविविधाद्वितीयसमाजहितकार्यक्रमाणां निर्वहणेन लब्धप्रतिष्ठं सञ्जाजायते । एतत्प्रयत्नप्रभावेण नैके लाभा अपि विद्यापीठेन प्राप्यन्त इति नैति पुनर्वचनीयताम् ।

ईदृशवृत्तान्तमण्डितामिमां **शेमुषीं** संस्कृतज्ञानां करकमलेषु समर्प्य नानन्दीति नश्चेतः ।


(वि.मुरलीधरशर्मा)

**आ नो भद्रा क्रतवो यन्तु विश्वतः । (May noble thoughts come and surround us from all sides.)**

# अखिलभारतशास्त्रार्थप्रशिक्षणशिबिरम् - २०१८

## ALL INDIA SHASTRARTHA TRAINING CAMP


**Dt.27.05.2018 to 11.06.2018**



महतः संस्कृतवाङ्मयप्रपञ्चस्य दुर्लभ-दुर्बोध्य-शास्त्रसमुच्चयस्य तात्त्विकपरिशीलनार्थं सहजसुखबोधार्थञ्च राष्ट्रियसंस्कृतविद्यापीठेनानेन विगतवर्षेमिव अस्मिन् वर्षेऽपि अखिलभारतशास्त्रार्थप्रशिक्षणवर्गस्य समायोजनं **27.05.2018** दिनाङ्कात् **11.06.2018** दिनाङ्कं यावत् यथाविधि समपद्यत। कुलपतीनाम् आचार्य वि.मुरलीधर शर्मणां मार्गनिर्देशने एतदर्थं नियोजिता समायोजनसमितिः यथाकालं यथाविधि च नवतिसंख्याकानाम् आचार्य-विशिष्टाचार्य-विद्यावारिधिच्छात्राणाम् अभ्यर्थनपत्राणि सम्प्राप्य प्रवेशपरीक्षां **26.05.2018** दिनाङ्के शिक्षाशास्त्रिभवने समचालयत् । तेषु उपषष्टिश्छात्राः उपस्थिता आसन् । न्याय-व्याकरण-पूर्वमीमांसा-ज्यौतिष-साहित्य-द्वैतवेदान्त-अद्वैतवेदान्तशास्त्रेषु ४५ छात्राः भागग्रहणाय अचिन्वन्त ।

अस्य कार्यक्रमस्य समुद्घाटनसमारोहः वैदिकमङ्गलाचरण-दीपप्रज्वालनाभ्यां २७.०५.२०१८ दिनाङ्के शिक्षाशास्त्रिभवने प्रारभत । वर्गस्यास्य समायोजकाः आचार्याः ओ.श्रीरामलालशर्माणः प्रशिक्षणशिबिरस्य उद्देश्यानि विवृत्य सर्वेषां स्वागतं समभिव्याहरन् । श्रीमन्तः आचार्याः रामचन्द्र जि.भट्टमहोदयाः (कुलपतयः एस्.व्यासविश्वविद्यालयः, वेङ्गलूरु) अस्य कार्यक्रमस्य मुख्यातिथयः छात्रान् दृश्यविधानेन वाक्यार्थकौशलतन्त्राणि अधिकृत्य समुदबोधयन् । **आचार्य म.म.चिं. पूर्णानन्दशास्त्रिणः** सारस्वतातिथिरूपेण समागत्य व्याकरणशास्त्रे महाभाष्यमधिकृत्य वाक्यार्थं कृत्वा कार्यक्रमः यशस्वी भूयादिति, छात्राः सर्वे शास्त्रार्थकरणकुशलाः भवेयुरिति च आशिषः अब्रुवन् । विद्यापीठस्य कुलपतयः **आचार्याः वि.मुरलीधरशर्माणः** कार्यक्रमस्यास्य आध्यक्ष्यमूढ्वा छात्रान् सर्वानपि विद्यासमुपार्जनाय शास्त्रार्थकरणकौशल- सम्पादनाय च प्रैरयन् । सन्दर्भेऽस्मिन् पद्मभूषण म.म.एन्.एस्.रामानुजताताचार्यविरचितस्य गादाधरीपञ्चलक्षणी-व्याख्यानस्य तृतीयसंस्करणस्य आविष्कारः मान्यैः अक्रियत । अन्ते **डॉ.कु.विश्वनाथशर्ममहोदयाः** समागतानामतिथीनां सर्वेषां विदुषां तथा छात्राणां कृते च धन्यवादान् समार्पयन् ।

तदनु तस्मिन्नेव दिने मध्याह्ने ३ वादने पाठाः प्रारब्धाः । कार्यक्रमस्य सुचारुचालनार्थं छात्राणां कृते प्रातः पञ्चवादनात् प्रारभ्य रात्रौ दशवादनं यावत् एका विधिबद्धसमयसारिणी निर्मिताऽऽसीत् । सारण्यामस्यां छात्राणाम् नित्यकर्मविधिसम्पादनकौशलम्, अध्ययनप्रक्रिया, अध्यापनसोपानम्, पुनरालोकनम्, अधीतविषयस्य मूल्याङ्कनम्, समयानुवर्तिता, शारीरिक-स्वस्थतासम्पादनार्थं योगाभ्यासः, ध्यानाभ्यासः, सांस्कृतिककार्यक्रमैः मनोविनोदः इत्यादयो नैके विषयाः सन्निविष्टा आसन् ।




सर्वत्र धैर्यमूलान्येव भद्राणि (Patience is every where the root of good.)





पञ्चदश दिनानि यावत् सञ्चालितेऽस्मिन् कार्यक्रमे पाठ्यक्रमाङ्गतया न्यायशास्त्रस्य "**सव्यभिचारं प्रथमलक्षणम्**", अद्वैतवेदान्ते "**शास्त्र-सिद्धान्तलेशसंग्रहस्य प्रथमपरिच्छेदः**", द्वैतवेदान्ते "**तात्पर्यचन्द्रिका**", व्याकरणे "**शब्दार्थसहिता प्रौढमनोरमा**", साहित्ये "**ध्वन्यालोकस्य ३-४ उद्द्योतौ**", मीमांसायां "**मीमांसान्यायप्रकाशः**", ज्योतिषे "**सूर्यसिद्धान्तस्य मध्यमाधिकारः, स्पष्टाधिकारः, त्रिप्रश्नाधिकारश्च**" इति सप्तशास्त्राणां निर्दिष्टविषयाः निर्धारिता अभूवन् ।

प्रशिक्षणशिबिरेऽस्मिन् भागग्रहीतृणां मूल्याङ्कनं तत्तच्छास्त्रनिपुणाः विद्वत्प्रवराः तत्तच्छात्रमुखाद् वाक्यार्थश्रवणेन लिखितपरीक्षया च अकुर्वन् ।

सांस्कृतिककार्यक्रमेषु विद्यापीठस्य "**प्रातिभम्**" इति सभामण्डपे समायोजितम् एम्.एम्.डॉ.सिहेच्. श्रीरामशर्ममहोदयानाम् अष्टावधानम् ; श्रीपद्मावतीमहिलाविश्वविद्यालयस्य सङ्गीतविभागस्य सहायकाचार्याणां डॉ.आर्.एन्.एस्.शैलेश्वरीमहाभागानां भक्तिसङ्गीतगानम्, राष्ट्रियसंस्कृतविद्यापीठस्य अतिथ्यध्यापिकायाः डॉ.शिरिषामहाभागायाः सङ्गीतोपस्थापनम्, श्रीराजमोहनमहोदयानां अन्नमाचार्यसङ्कीर्तनगानम्, डॉ.शङ्करभट्टमहोदयानां च हरिकथावाचनं सर्वथा समेषां मनोमोहकमासीत् ।



अन्ते जुन्मासस्य एकादशे दिनाङ्के कुलपतीनामाध्यक्ष्ये ; प्रसिद्धव्याकरणविन्महामहोपाध्याय-डॉ.के.सत्यनारायणमहाभागानां मुख्यातिथिपदभूषिते सति कार्यक्रमस्यास्य स्वस्तिवाचनिकमहोत्सवः पर्यपाल्यत । डॉ,सत्यनारायणमहोदयाः तेषां मुख्यातिथिभाषणे पारम्परिकपाठविधौ पङ्क्तिपाठस्य महत्त्वं प्रतिपादयन्तः, तत्सुरक्षणार्थं नियततत्परं राष्ट्रियसंस्कृतविद्यापीठं भूरिशः प्राशंसन् । कुलपतयोऽपि स्वीयाभिभाषणे संस्कृतस्य प्रचारप्रसारार्थं विद्यापीठेन सर्वदा यत्नः विधास्यते इति प्रत्यश्रुण्वन्। अन्ते भागग्रहीतॄणां कृते प्रमाणपत्राणि अतिथिभिः प्रदत्तानि, कार्यक्रमस्य संयोजकाः डॉ.के.विश्वनाथमहोदयाः सर्वेषां कृते धन्यवादान् आविरकुर्वन् ।






मेधा मे इन्द्रो ददातु मेधां देवी सरस्वती । मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा । (May Indra provide me Intellect, May Saraswati Deve Provide me Intellect. May the twins of Asvins, who have worn the garland of lotuses, provide me Intellect.)

# चतुर्थान्तारािष्ट्रययुववैज्ञानिकमहासभा तथा वैदिकविज्ञानकार्यशाला

## 4th INTERNATIONAL YOUNG SCIENTIST CONGRESS (IYSC-2018) & WORKSHOP ON VEDIC SCIENCE (8th & 9th May, 2018)



अस्मिन् शैक्षिकवर्षे मे मासस्य अष्टम-नवमदिनाङ्कयोः (8th & 9th May, 2018) युववैज्ञानिकानां कृते अन्तारािष्ट्रयप्रातिभप्रदर्शनवेदिकां प्रकल्प्य तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठं (Rashtriya Sanskrit Vidyapeetha, Tirupati, A.P.) तथा इन्दोरस्थान्तारािष्ट्रय-विज्ञानजनतासमितिः (International Science Community Association, Indore, Madhya Pradesh) इति संस्थयोः संयुक्ताध्वर्यवे विद्यापीठप्राङ्गणे दिनद्वयात्मिका चतुर्थान्तारािष्ट्रययुववैज्ञानिकमहासभा समायोज्यत ।

सभायामस्यां समुद्घाटनसमारोहे विद्यापीठस्य मान्याः कुलपतयः **आचार्याः वि.मुरलीधरशर्ममहोदयाः** मुख्यातिथयस्तथा च श्रीपद्मावतीमहिलाविश्वविद्यालयस्य कुलपतयः आचार्य वि.दुर्गाभवानीमहाभागाः सारस्वतातिथय आसन् । स्वीयमुख्यातिथिभाषणे श्रीयुक्तशर्ममहोदयाः संस्कृतवाङ्मयमस्माकं बहुमूल्यरत्नमञ्जूषेति प्रतिपादयन्तः विश्वस्मिन् विश्वे अनानुकृत्यविषयैः सह भाषैषा नियतं विद्योततेतरामिति समुदघोषयन् । दर्शन-योग-आयुर्वेदादिक्षेत्रे संस्कृतस्य महत्त्वपूर्णयोगदानं वर्तते । पृथिवी शान्तिः, द्यौः शान्तिः, आपः शान्तिः ; मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव ; सत्यं वद, धर्मं चर ; योगश्चित्तवृत्तिनिरोधः ; अनादिमव्ययं दिव्यम् इत्यादीनां मन्त्र-सूत्राणां च स्मरणं कृत्वा कुलपतयः संस्कृतस्य दर्शनयोगायुर्वेदशाखानां वैज्ञानिकत्वं प्राकटयन् । जापानदेशस्य प्रसिद्धौषधविशारदैः **योशिनोरी ओसुमी** महाभागैः Autophagy विषयमाधारीकृत्य यदनुसन्धानमकारि, तदस्माकं पुराणशास्त्रेषु वर्णितैः एकादशीप्रभृतिभिः उपवासैः सह सामञ्जस्यं भजते । उपवासाः अस्माकं शरीरमस्मदधीनं कारयन्ति । शरीरस्य स्नायुतन्त्रेषु शक्तिः





उपवासद्वारा वर्धते । इत्येवं बहुधा संस्कृतभाषायाः वैज्ञानिकत्वमुपस्थाप्य मान्याः कुलपतयः युववैज्ञानिकान् इतोऽपि संस्कृतभाषायाः गभीरानुसन्धानार्थं समप्रेरयन् ।

समुद्घाटनसमारोहस्य स्वागतभाषणं ISCA संस्थाप्रमुखैः **डॉ.दीपकशर्ममहोदयैः** व्यधायि । विद्यापीठस्य कुलसचिवाः **आचार्य सिहेच्.पि.सत्यनारायणमहोदयाः** विद्यापीठस्य ऐतिहासिकपृष्ठभूमिं प्रास्तुवन् । सभासद्भिः सन्दर्भेऽस्मिन् महासभायाः ई-स्मरणिकायाः लोकार्पणमक्रियत । सभान्ते महासभायाः स्थानीयसंयोजकाः **आचार्य राणीसदाशिवमूर्त्तिमहाभागाः** सर्वेषां कृते धन्यवादसमर्पणमकुर्वन् ।







द्विनद्वयं यावत् प्रचलितेषु विंशतिसंख्याकेषु सत्रेषु नैजेरिया-मालयेसिया-इण्डोनेसिआ-ताजकिस्थान-आफगानिस्थान-वांग्लादेश-भारतदेशेभ्यः समागताः प्रायशः १ ५ ३ भागग्राहिणः स्वीयशोधपत्राणि प्रास्तुवन् । सत्रेषु उत्तमपत्रप्रस्तोतॄणां कृते अन्तारािष्ट्रययुववैज्ञानिकपुरस्कारः प्रदत्तः । प्रतिसत्रं प्राप्तपुरस्काराणां नामानि यथा —

| | |
|---|---|
| 1) Agriculture, Forestry and Horticulture | **UPASANA CHETTRY**, Centre for Advance Studies in Botany, North Easter Hill University, Shillong, Meghalaya, India |
| 2) Animal, Veterinary and Fishery | **SWATHY K.S.**, Kerala University of Fisheries and Ocean Studies (KUFOS), Panangad, Kochi, Kerala, India |
| 3) Biological Science | **S.MANJULA,** Laboratory of Biocrystallography and Computational Molecular Biology, Dept. of Physics, Periyar University, Salem, Tamilnadu, India |
| 4) Chemical Science | **SANGEETHA KARANTH**, Dept. of Chemistry, Mangalore University, Mangalagangothri, Karnataka, India |
| 5) Engineering, Energy, Architect and Planning | **N.AVINASH KUMARY REDDY**, Dept. of Civil Engineering, Annamacharya Institute of Technology and Science, Kadapa, AP, India |



| | |
|---|---|
| 6) Environmental Science | **MRS. SUNITA DAS**, Dept. of Marine Science, Berhampur University, Berhampur - 7, Ganjam, Odisha, India. |
| 7) Forenisic, Medical, Dental and Nursing | **SIVA RAMI REDDY E**, Faculty of Homoeopathy, Tantia University, Sri Ganganagar, Rajasthan, India |
| 8) Material Science | **RAJESH KUMAR MEENA**, Dept. of Pure and Applied Chemistry, University of Kota, Kota - 324005, Rajasthan, India |
| 9) Mathematical and Statistics | **SURAWALA JAIMIKA,** C.B.Patel Computer College & J.N.M.Patel Sceince College, Surat, Gujurat, India. |
| 10) Farmaceutical Science | **SHIVANI R.PANDYA,** School of C.Sciences, Central University of Gujurat, Gandhinagar - 382030, Gujarat, India. |
| 11) Physical Science | **PRIYA R.,** Dept. of Physics, Periyar University, Salem, Tamilnadu, India |
| 12) Physical Education, Sports and Yoga | **SRIHARISUKESH N.**, Dept.of Human Consciousness and Yogic Science, Mangalore University, Mangalagangothri, Karnataka, India |
| 13) Library Science | **BALAWANT RAWAR,** Dept. of Agriculture and Forestry, Graphic Era Hill University, Society Area, Clement Town, Dehradun - 248002, Uttarakhand, India. |
| 14) Language and Literature | **ARCHAKAM SRIVIDYA**, Dept.of Vyakarana, Rashtriya Sanskrit Vidyapeetha, Tirupati. |
| 15) Social and Humanity | **SAIRABANU DARAGAD,** Dept. of Human Development and Research Centre, Smt. VHD Central Institute of Home Science, Bangalore University, Seshadri Road, Bangalore, Karnataka, India. |

महासभायाः समापनसमारोहः ०९.०५.२०१८ तमे दिनाङ्के अन्ताराष्ट्रियविज्ञानसमाजसङ्घस्य (ISCA) संयोजकानां डॉ.दीपकशर्मणां स्वागतपुष्पिकया प्रारब्धः विद्यापीठस्य तात्कालिककुलसचिवानाम् आचार्य सिहेच्.पि.सत्यनारायणमहोदयानां प्रबोधनवचोभिः, बांग्लादेश-नैजेरियादेशात्समागतयोः भागग्रहित्रोः डॉ.महम्मद इस्लाम-डॉ.पौलमहोदययोः अनुभवकथनैः मुखरितः ; महासभाप्रान्तीयसंयोजकसचिवानाम् आचार्यराणिसदाशिवमूर्त्तिमहाभागानां धन्यवादसमर्पणेन समाप्तोऽभूत् ।





काले खलु समारब्धाः फलं बध्नन्ति नीतयः (Policies launched at the right time are sure to yield good result)



# युवसंस्कृतलेखकसम्मेलनम्

## YOUNG SANSKRIT WRITERS' MEET

**10th & 11th, August-2018**



नवनवोन्मेषशालिनां प्रज्ञावतां यूनां कविप्रातिभप्रदर्शनार्थं विद्यापीठप्राङ्गणे नवदेहलीस्थायाः **केन्द्रसाहित्य एकाडेमी**ति संस्थायाः मिलितसहयोगेन दिनद्वयव्यापकं (10th & 11th, August-2018) युवसंस्कृतलेखक-सम्मेलनं महता वैभवेन समानुष्ठीयत । वर्तमानकालिकसमाजप्रतिबिम्बस्वरूपं संस्कृतसाहित्यदर्पणे प्रतिफलनं विधातुं नैके युवकवयः भारतवर्षस्य विविधकोणेभ्यः कार्यक्रमेऽस्मिन् भागं ग्रहीतुं समाहूता आसन् ।

सम्मेलनमिदं विद्यापीठस्य पद्मभूषणाचार्यश्रीरमारञ्जनमुखर्जिसभाङ्गणे १०.०८.२०१८ तमे दिनाङ्के प्रातः दशवादने संस्कृतसाहित्यसमुपासकानां व्याकरणशास्त्रनिष्णातानां नानाग्रन्थप्रणेतृणां साहित्यिकानां श्रीमतां जनार्दनहेगडे महोदयानां संस्कृतभारतीसेवकानां मुख्यातिथित्वे, कुलपतीनां वि.मुरलीधर-शर्ममहोदयानां च आध्यक्ष्ये समुदघाटि । मुख्यातिथयः तेषां भाषणे उत्तमलेखन-गुणवत्ताविकासार्थं वस्तु-निरूपण-भाषाणां सामूहिकसामग्र्यः अपेक्ष्यन्ते इति प्रतिपादयन्तः व्याकरणस्य महत्त्वमुररीकुर्वन् । साहित्याकादम्याः भाषाशिष्ट-समितेः समाह्वायकाः वाराणसीस्थसम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचराः डॉ.अभिराजराजेन्द्रमिश्रमहोदयाः तेषां प्रारम्भिकभाषणे विश्वस्तरे प्रतिष्ठापितं संस्कृतभाषायाः गौरवं विस्तरेण प्रत्यपादयन् । एकाडेमीसचिवाः श्री के.श्रीनिवासरावमहाभागाः अतिथीनां स्वागतं व्यदधुः । अन्ते च विद्यापीठस्य सङ्कायप्रमुखाः आचार्य आर्.एल्.एन्.शास्त्रिमहाशयाः सर्वेभ्यः धन्यवादान् समार्पयन् । सभायाः सञ्चालनं संयोजकेन डॉ.भारतभूषणरथमहोदयेन सहसंयोजकेन डॉ.यशस्विवर्यस्य सहयोगेन कृतम् ।

दिनद्वयव्यापकेऽस्मिन् कार्यक्रमे पञ्च सत्राणि आसन्, यत्र संस्कृतस्य वैश्विकस्वरूपपर्यालोचनम्, कथासु उत्कृष्टताधानाय सोपानम् इत्यादिभिः विषयैः सह आधुनिककाले शास्त्ररचनापरम्पराऽपि चर्चिताऽभूत् । नववसन्ते नवपल्लवैः यथा वृक्षाः कुसुमिताः मनोहराः भवन्ति, तथैव नवीनयुगेऽस्मिन् नवच्छन्दो-गीत-मुक्तककवितामन्दाकिन्या विद्यापीठस्य वातावरणं प्रफुल्लितं सञ्जातम् । "वयं तव वर्त्मनि", "वीक्षे वसन्तं प्रकृतं वसन्तम्", "हायकूलहरी", "कः महान्", "कविकृतिमथ शृणु", "सघनघनघटा", "वसुधासुप्रभातम्", "त्वम् इन्द्रमित्रम् अहम् ऋषिपुत्रः", "प्रेयसीप्रासपङ्क्तिः", "रावणोपालम्भः" इत्यादयः नैकाः कविताः कविकण्ठाभरणभूषिता आसन् । सत्रविवरणं यथा —

### प्रथमसत्रम् - कवितापाठः

**10.08.2018 ; 11.30 am to 1.00 p.m.**

**सत्राध्यक्षः -** आचार्य जि.एस्.आर्.कृष्णमूर्त्तिः

**काव्यपाठकाः -** राजकुमारमिश्रः (हरियाणा)
अरविन्दकुमारतिवारी (उत्तरप्रदेशः)
ऋषिराजपाठकः (नवदेहली)
नारायणदाशः (पश्चिमवङ्गम्)

**संयोजकः -** डॉ.सिहेच्.नागराजः (तिरुपतिः)




काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् । (The wise utilize their time enjoying poetry and scriptures.)




द्वितीयसत्रम् - आधुनिककाले शास्त्रलेखनम्
10.08.2018 ; 02.30 pm to 4.00 pm

| | |
|---|---|
| सत्राध्यक्ष: - | रमाकान्तपाण्डेय: (नवदेहली) |
| पत्रवाचका: - | पेन्नामधुसूदन: (महाराष्ट्रम्) |
| | दत्तात्रेयमूर्त्तिः (तामिलनाडु) |
| | पवनकुमारसतलूरि (केरलम्) |
| संयोजक: - | डॉ.ओ.जि.पि.कल्याणशास्त्री (तिरुपति:) |



तृतीयसत्रम् - लघुकथापाठ:
10.08.2018 ; 04.10 pm to 6.10 pm

| | |
|---|---|
| सत्राध्यक्ष: - | आचार्य एम्.एल्.एन्.मूर्त्ति: (तिरुपति:) |
| पत्रवाचका: - | सुधाकरमिश्र: (पश्चिमवङ्ग:) |
| | गायत्रीमुरलीकृष्ण: (नवदेहली) |
| | उदयनहेगडे (वाङ्गालोर्) |
| संयोजक: - | डॉ.निरञ्जनमिश्र: (तिरुपति:) |



चतुर्थसत्रम् — समसामयिककथापाठ:
11.08.2018 ; 09.30 am to 11.30 am

| | |
|---|---|
| सत्राध्यक्ष: - | आचार्य एस्.सुदर्शनशर्मा (तिरुपति:) |
| पत्रवाचका: - | डॉ.सम्पदानन्दमिश्र: (पण्डिचेरी) |
| | नौनीहालगौतम: (मध्यप्रदेश:) |
| | डॉ.परम्बा योगमाया (ओडिशा) |
| संयोजक: - | डॉ.सोमनाथदाश: (तिरुपति:) |




पञ्चमसत्रम् — आधुनिककाव्यपाठ:
11.08.2018 ; 11.40 am to 01.00 pm

| | |
|---|---|
| सत्राध्यक्ष: - | आचार्य राणीसदाशिवमूर्त्ति: (तिरुपति:) |
| पत्रवाचका: - | डॉ.राधावल्लभशर्मा (हिमाचलप्रदेश:) |
| | डॉ.शिवरामभट्ट: (महाराष्ट्रम्) |
| | डॉ.पङ्कजकुमारव्यास: (हरियाणा) |
| संयोजक: - | डॉ.के.कादम्बिनी (तिरुपति:) |



**समापनसमारोह:**

सम्मेलनस्य समापनसमारोह: ११.०८.२०१८ दिनाङ्के अपराह्णे २.३० घटिकायां रमारञ्जनमुखर्जिसभाङ्गणे समायोज्यत । सन्दर्भेऽस्मिन् बेङ्गालोरनगरस्य लब्धप्रतिष्ठा: संस्कृतविद्वांस: हेच्.एस्.विश्वासमहोदया: सारस्वतातिथय:, जयपुरनगरात् समागता: प्रसिद्धा: शिक्षाविद: आचार्या: वै.यस्.रमेशमहोदया: मुख्यातिथय: तथा च विद्यापीठस्य व्याकरण-विभागाचार्या: आचार्य जे.रामकृष्णमहोदया: अध्यक्षा: आसन् । सम्पूर्णसमापन-महोत्सवस्य सञ्चालनं संयोजनं च डॉ.यशस्विमहोदयेन कृतम् ।

जयन्ति ते सुकृतिनो रससिद्धा: कवीश्वरा: । नास्ति येषां यश:काये जरामरणजं भयम् ।। (Pre-eminently shine those blessed great poets who are connoisseurs of sentiments for whose body of fame there is no fear of old age and death.)




# संस्कृतनवरात्रमहोत्सव:
## SANSKRIT NAVARATRA CELEBRATION
## 24.08.2018 to 01.09.2018




विद्यापीठस्य संस्कृतमयवातावरणे **24.08.2018** दिनाङ्कात् **01.09.2018** दिनाङ्कं यावत् संस्कृतनवरात्रमहोत्सव: महता वैभवेन पर्यपाल्यत । कार्यक्रमस्य समुद्घाटनसमारोहे तिरुमलातिरुपतिदेवस्थानस्य प्रकल्पनिदेशका: प्रसिद्धसंस्कृतविद्वांस: आचार्य समुद्राललक्ष्मणय्यमहोदया: मुख्यातिथय:, तथा च विद्यापीठस्य कुलपतय: **आचार्या: वि.मुरलीधर शर्ममहोदया:** अध्यक्षा: आसन् । अवसरेऽस्मिन् कुलसचिवा: आचार्य **जि.एस्.आर्.कृष्णमूर्त्तिमहोदया:** स्वागतभाषणं व्यदधु: । सम्पूर्णकार्य-क्रमस्य सञ्चालकौ **डॉ.सि.रङ्गनाथन्-डॉ.भारतभूषणरथौ** आस्ताम् । नवदिनानि यावत्प्रचालितेऽस्मिन् महोत्सवे नैके शैक्षिक-सांस्कृतिककार्यक्रमा: समचाल्यन्त । तद्यथा -

२४.०८.२०१८ तमे दिनाङ्के सायं पञ्चवादने "कवितापाठसमनुगुणं चित्राङ्कनम्" इति नाम्ना सत्रमासीत् । तत्र आचार्य कोम्पेल्लराम-सूर्यनारायणमहोदयानां श्लोकश्रवणपूर्वकं तिरुपतिस्था: विशिष्टचित्रशिल्पिन: श्रीसिङ्गपल्लि सत्यनारायणमहोदया: सुन्दरं तात्कालिकं चित्रं व्यलिखन् ।

द्वितीयसत्रे २५.०८.२०१८ तमे दिनाङ्के सायं सार्धपञ्चवादने (५.३०) **भजनसन्ध्या, नृत्योत्सवश्च** मनोमोहकरीत्या छात्रै: प्रदर्शितम् । नृत्येषु भरतनाट्यम्, कूचिपूडि, ओडिशी इत्यादीनि नृत्यानि अन्तर्दौवारिक-क्रीडाङ्गणे प्रदर्शितानि । अत्र आचार्य वि.सुजातामहाभागा: सत्राध्यक्षा: तथा च डॉ.ए.सच्चिदानन्दमूर्तिमहोदया: संयोजका आसन् ।



तृतीयदिवसे (२६.०८.२०१८) प्रात: दशवादनत: विविधा: शैक्षिकस्पर्धा: तिरुपतिनगरस्य प्रसिद्धशिक्षानुष्ठानेषु यथा राष्ट्रियसंस्कृत-विद्यापीठस्य अभिमन्युबालकेन्द्रे, वण्डरकिड्सविद्यालये, भुवनेश्वरी-विद्यानिकेतने, एस्.वि.प्राच्यविद्यालये, एस्.वि.हेच्.विद्यालये, कैम्ब्रिज्-विद्यालये, एस्.पि.जि.हेच्.विद्यालये, एस्.पि.जे.एन्.एम्.विद्यालये, केन्द्रीयविद्यालये, भारतीयविद्याभवने च संस्कृतभाषाया: प्रचारार्थं प्रसारार्थं च शिशूनां कृते समायोजिता: आसन् । श्लोकपाठ:, वाक्यरचना, कथावाचनम्, भाषणम्, गीतगानस्पर्धा, नृत्यस्पर्धा इत्यादय: स्पर्धा: अत्र अल्लेखनीया: भवन्ति । एतासां सर्वासामपि स्पर्धाणां पर्यवेक्षणं प्रो.प्रह्लाद आर्.जोशीमहोदयै: कृतम् । अभिमन्युबालकेन्द्रपक्षत: सामूहिकपदयात्राऽपि समायोज्यत ।



चतुर्थदिवसे (२७.०८.२०१८) मधुरं मधुराक्षरं श्रीमद्रामायणं छात्रै: अध्यापकैश्च समुदगीयत । सन्दर्भेऽस्मिन् डॉ.के.गणपतिभट्टमहोदया:, डॉ.यशस्विमहाशया:, डॉ.सिहेच्.नागराजमहाभागाश्च रामायणमधिकृत्य प्रवचनं प्रास्तुवन् । डॉ.आर्.चन्द्रशेखरमहोदया: अस्य सत्रस्य संयोजका आसन् ।

पुमान् पुमांसं परिपातु विश्वत: (ऋ.वे. - ६/७५/१४) (May the man protect other on everyside.)





**पञ्चमदिवसे** (२८.०८.२०१८) कवितासम्मेलनं समायोजि । तत्र आचार्या: जि.एस्.आर्.कृष्णमूर्त्तिमहोदया: सत्राध्यक्षा: तथा च सिहेच्.नागराजमहोदया: संयोजका आसन् । कवितल्लजा: आचार्य का.इ.देवनाथन्-आचार्य एम्.एल्.एन्.मूर्त्ति-आचार्य राधाकान्तठाकुर-आचार्यसत्यनारायणाचार्य-डॉ.भारतभूषणरथ-डॉ.जे.बि. चक्रवर्ति-डॉ.सिहेच्.नागराज-डॉ.प्रदीपकुमारबाग-डॉ,श्वेतपद्माशतपथी-डॉ.रुरुकुमार-महापात्रप्रमुखा: स्वीयकाव्यप्रतिभां प्रादर्शयन् ।

**षष्ठदिवसे** (२९.०८.२०१८) राष्ट्रियचर्चासत्रे संस्कृतस्य वैभवमाधारीकृत्य नैके अध्यापका: स्वीयशोधपत्राणि प्रास्तुवन् । सत्रेऽस्मिन् आचार्य जे.रामकृष्णमहोदया: अध्यक्षा आसन्, तथा च कुलपतय: वि.मुरलीधरशर्ममहोदया: मुख्यातिथिपदं ; विद्यापीठस्य कुलपतिचरा: आचार्य एम्.एल्.एन्.मूर्त्तिमहाभागा:, शैक्षिकसङ्कायप्रमुखा: आचार्य आर्.एल्.एन्.शास्त्रिमहोदयाश्च सारस्वतातिथिपदं व्यभूषयन् । सङ्गोष्ठ्यामस्यां प्रायश: १२० विद्वांस: षट्सु सत्रेषु पत्राणि समर्पितवन्त: । आचार्य ओ.एस्.रामलालशर्मा, आचार्य का.इ.देवनाथन्, आचार्य राधाकान्तठाकुर:, आचार्य सिहेच्.पि.सत्यनारायण:, आचार्य उन्निकृष्णनम्पियातिरि:, आचार्य लता इति प्रमुखा: आचार्या: सत्राध्यक्षा आसन् । आचार्यसत्यनारायणाचार्य:, आचार्य के.राजगोपालन्, आचार्य जे.बलिचक्रवर्तिप्रमुखा: सत्रसंयोजनामकुर्वन् ।

**सप्तमदिवसे** (३०.०८.२०१८) रसप्रश्नकार्यक्रम: आचार्य-श्रीपादभट्टमहोदयानामाध्यक्ष्ये समचाल्यत । अस्य संयोजका: डॉ.सि.रङ्गनाथन् महोदया आसन् । अत्र प्रायश: २०० छात्रा: भागमगृह्णन् ।

अष्टमदिवसे (३१.०८.२०१८) विद्यापीठीयच्छात्राणां प्रातिभ-विकासार्थं नैका: स्पर्धा: चालिता: । सत्रस्यास्य संयोजका: डॉ.राधागोविन्द-त्रिपाठिमहाभागा: तथा डॉ.लीनाचन्द्रामहाभागा आसन् ।

**स्वस्तिवाचनिकमहोत्सवे**(०१.०९.२०१८) प्राप्तराष्ट्रपति-सम्माना: आचार्य कोम्पेल्लरामसूर्यनारायणमहोदया: मुख्यातिथय:, कुलपतय: वि.मुरलीधरशर्ममहोदया: अध्यक्षा: तथा च नवरात्रकार्यक्रमसमिते: मार्गदर्शका: कुलपतिचरा: आचार्य एम्.एल्.एन्.मूर्त्तिमहाभागा:, कुलसचिवा: प्रो.जि.एस्.आर्.कृष्णमूर्त्तिमहाभागा:, शिक्षाविभागस्य सङ्कायप्रमुखा: आचार्य प्रह्लाद आर्.जोशिमहाशया: सारस्वतातिथय: आसन् । कार्यक्रमेऽस्मिन् विविधस्पर्धासु भागमूढ्वा विजेतॄणां कृते पुरस्कारवितरणेन सह विद्यापीठस्य अन्तर्जालीयानां Face-book, You-tube इति सामाजिकवार्ता-प्रसारमाध्यमानामुद्घाटनमपि अक्रियत । दिवस्यास्य आरम्भ: विद्यापीठस्य छात्राणां, कर्मचारिणाम्, अधिकारिणाम्, अध्यापकाध्यापिकानां च पदशोभायात्राद्वारा अशोभत । सर्वेषां कार्यक्रमाणां संयोजक: डॉ.सि.रङ्गनाथन्महोदय:, सहसंयोजकश्च डॉ.भारतभूषणरथमहोदयश्च आसीत् ।







## महात्मगान्धिन: पञ्चाशदधिकैकशततमजन्ममहोत्सव:
## CELEBRATION OF THE 150th BIRTH ANNIVERSARY OF MAHATMA GANDHI



**भा**रतस्य राष्ट्रपितु: मोहनदासकरमचन्दगान्धिमहोदयस्य जन्मदिनमुप-लक्ष्य प्रतिसंवत्सरम् अक्टोबर-मासस्य द्वितीयदिनाङ्के "गान्धिजयन्ती" महोत्सव: देशस्य सर्वत्र शिक्षानुष्ठानेषु महता वैभवेन परिपाल्यते । अस्मिन् संवत्सरेऽपि विश्वविद्यालयानुदानायोगस्य निदेशानुसारेण उत्सवोऽयं तेषां महानुभावानां पञ्चाशदधिकैकशततमजन्ममहोत्सवं पुरस्कृत्य विद्यापीठ-प्राङ्गणे पर्यपाल्यत । सन्दर्भेऽस्मिन् 25-11-2018 तमे दिनाङ्के महात्मगान्धिन: जीवनं दर्शनं च आधारीकृत्य राष्ट्रियचर्चासत्रम्, 28-11-2018 तमे दिनाङ्के छात्रेषु भाषणस्पर्धा तथा च छात्र-अध्यापक-कर्मचारिषु 29-11-2018 तमे दिनाङ्के देशभक्तिगानस्पर्धा च समायोज्यन्त । जयन्तीमहोत्सवस्य उद्घाटनं विधाय मान्या: कुलपतय: गीतोक्तभगवद्वचनम् उद्धृत्य गान्धिन: सात्त्विकचरित्रं समुपास्थापयन् । यथा -

**मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वित: ।**
**सिद्ध्यसिद्ध्योर्निर्विकार: कर्ता सात्त्विक उच्यते ।।**

(भ.गीता - १८/२४)

आचार्य.ए.लक्ष्मणचेट्टिमहाभागा: मुख्यातिथित्वेन समुपस्थाय स्वीये उद्घाटनभाषणे भक्तिगीतनैतिकता, असहिष्णुता, अहिंसा, सत्यम्, प्रेम, मानवनिर्माणम्, शिशुवात्सल्यम् इत्यादिविषयेषु गान्धिन: भूमिका कीदृशी आसीत् तत्सर्वं प्राबोधयन् । आङ्ग्लशासनसमये अहिंसाऽऽन्दोलनम्, अस्पृश्यता-दारिद्र्यदिसामाजिकव्याधीनां निवारणम् इत्यादि तस्य जनजागरण-सम्बद्धकृतीनाम् उपरि चेट्टिमहोदयानां प्रधानम् अभिभाषणमासीत् । कार्यक्रमारम्भे विद्यापीठस्य छात्रै: कलासंस्कृतिपरिषद: संयोजकानां डा.नारायणमहोदयानां तत्त्वावधानेन सहसंयोजिकाया: डॉ.लीलाचन्द्राया: सहयोगेन च प्रस्तुतं लघुचलच्चित्रं "**सङ्कल्पबलम्**" प्रदर्शितम् । चलच्चित्रस्य इतिवृत्तं कुलसचिवै: विद्यापीठकालिदासोपाधिभाग्भि: आचार्य.जि.यस्.आर्. कृष्णमूर्तिमहाभागै: रचितम् आसीत् ।

**।। सङ्कल्पबलम् ।।**

महात्मन: गान्धिन: पञ्चाशदुत्तरैकशततमजन्मदिनोत्सवमुप-लक्ष्य तदीयात्मकथाधारितसत्यशोधननामकस्य पण्डितमहो-सकेरेनागप्पाशास्त्रिण: संस्कृतानुवादमुपजीव्य सङ्कलितं लघुवृत्त-रूपकं सङ्कल्पबलम् ।

।। श्री: ।।

।। नान्दी ।।

**शमिनामग्रणीर्धीमानहिंसादिव्यशस्त्रभृत् ।**
**गुणरत्नमहापुण्यो लोकसेवापरायण: ।।**
**स्वातन्त्र्ययुद्धसेनानी: यो महात्मेति गीयते ।**
**तस्मै तुभ्यं गान्धिवर्य ! नमोवाकं प्रशास्महे ।।**


*(नेपथ्ये — अव्यक्तमधुरं सङ्गीतकमनुतिष्ठति ।*
*अहिंसा परमोधर्म:, सत्यमेव जयते ।)*

।। प्रस्तावना ।।

सूत्रधार: — आर्ये .. ! साधु गीतं साधु गीतम् ।
नटी — आर्य ! अनुगृहीतास्मि धन्यवादा: ।
सूत्रधार: — आर्ये कथं हर्षातिरेक: कलकल: ?
नटी — पुण्यश्लोकस्य कस्यचित् जन्मदिवसमहोत्सव: समनुष्ठीयते ।
सूत्रधार: — कस्य ?
नटी — कस्यचन महात्मन: ।
सूत्रधार: — केन प्रकारेण अनुष्ठीयते ?
नटी — सर्वे आबालवृद्धं खादीवस्त्राणि धृतवन्त: ।
सूत्रधार: — पुन: ?
नटी — त्रिवर्णपताका: हस्ते गृहीतवन्त: । ते लहरीकुर्वन्त: गायन्त: नृत्यन्त: राजपथेषु शोभायात्रां कुर्वन्ति । तत: यात्रायामन्ते "महात्मन् ! जय जय" इत्युच्चै: निनदन्ति । आर्य ! कोऽयं भवितुमर्हति महात्मा ?
सूत्रधार: — (दीर्घं विचिन्त्य स्मृत्वा) आ: ज्ञातम् ।

**अहिंसामेव संश्रित्य हिंसां गन्धयितुं क्षम: ।**
**गान्धिरेको महात्मा स्यात्कुटुम्बी जगतो मुनि: ।।**

नटी — (सहर्षम्) आ: हन्त ! स्मृतिपथमागतम् । अद्य खलु तस्य जन्मदिनम् । पञ्चाशदुत्तरशतम् अक्टोवरमासस्य द्वितीयदिनाङ्क: । गृहकर्मरता विस्मृतवती ।
सूत्रधार: — तदेव पुरस्कृत्य नगरजना: शोभायात्रामनुतिष्ठन्ति ।



नटी — तर्हि वयमपि स्वकुशीलवकर्मणा तं महात्मानमनुशीलयामः ।

सूत्रधारः — अस्तु तावत् । अयि ! जानाति भवती ?

नटी — किम् ?

सूत्रधारः — महात्मना गान्धिना आत्मकथा लिखितेति ।

नटी — सत्यशोधननामिकाकृतिः ।

सूत्रधारः — अमरभाषायामनूदिता पण्डितहोसकेरेनागप्पशास्त्रिणा ।

नटी — तदाधारीकृत्य राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिमहाशयस्य आचार्यस्य विरिवेण्टिमुरलीधरशर्मणः आदेशेन कुलसचिवेन आचार्यगुल्लपल्लिश्रीरामकृष्णमूर्त्तिना "**सङ्कल्पबलम्**" इति लघुरूपकं सम्पादितम् । तदिदानीं प्रदर्शयामः ।

नटी — (नेपथ्ये जय गान्धिमहोदय ! सत्यमेव जयते । अहिंसा परमो धर्मः इति पुनस्सङ्गीतकं श्रुत्वा) आर्य ! किमेतत् ?

सूत्रधारः — (परिक्रम्य निपुणं निरीक्ष्य) आर्ये ! अयमेव शभ्रमतीनदीतीरे गान्धिनः आश्रमः । सत्यशोधनग्रन्थं पूरयन्नुपविशति । त्वर्यन्तां कुशीलवाः तत्रैव गच्छामः ।

नटी — यदादिशति आर्यः । (इति निष्क्राम्यतः)

(इति प्रस्तावना)

**।। प्रथमदृश्यम् ।।**

***स्थलम् — शभ्रमत्याश्रमः । समयः – प्रत्यूषः ।***

***गान्धी लिखन्नास्ते ।***

**गान्धी** — इतः पूर्वं चतुःपञ्चवत्सरेभ्यः प्राक् केषांचित्परमात्मनां मदीयसहोद्यमिनामिष्टानुसारेण स्वीयाम्, आत्मकथामुपनिबद्धुं प्रतिज्ञातवान् । उपक्रान्तलेखनेन च प्रथमपुटं परिसमाप्य यावदावर्तितं पत्रं तावन्महामोहनगर्यां हस्ताहस्तिमहाक्षोभसमुद्भवात् कार्यमेतद्विघ्नितमासीत् । तदनन्तरघटनाभिश्च पर्यन्ते यरवडाकारागृहवासो मया लब्धः । तत्र मे सहबन्दिनामेकतमः श्रीजयरामार्यः सर्वथा कार्यान्तरं परित्यज्य आत्मकथाप्रसङ्गः परिपूरणीय इति मामबोधयत् । कार्यान्तरव्यापृतत्वान्मनसः न मे तत्र प्रवृत्तिरित्युक्त्वा तं व्यसर्जयत् । तदनु यरवडाकारागाराद्विमुक्तः । कतिपयदिवसानन्तरं तत्र भवद्भिः श्रीमदानन्दस्वामिभिः पुनरस्य कृते प्राबोधितः नवजीवनपत्रिकायाः कृते प्रतिसप्ताहमेकप्रकरणक्रमेण क्रमेण लेखितुं प्रवृत्तः । अत्रान्तरे मौनव्रतस्थं मां भगवद्भक्तः उपसृत्य आत्मकथालेखनं पाश्चात्त्यपरम्परोन्मेषितं न लिखत्विति प्रत्यषेधीत् । पुनरनुलोचितवता मया तल्लेखने नास्ति दोष इति निश्चप्रचम् । यतः — "धर्मो विश्वस्य जगतः प्रतिष्ठा" इति खलु श्रुतिवचनम् । नीतिरेव जीवातुर्धर्मस्य । नीतिमानेव सत्यमूर्तेरीश्वरस्य उपासको भवति । स एव सत्यस्वरूपः । सत्याद् भिन्नं मिथ्या । सत्यसाधनपक्षे मच्छरीरमपि आहुतीकर्तुं न विकल्पयिष्ये । एवं मे श्रद्धा । कथमियं श्रद्धा स्थैर्यमाप्नोति ? जिज्ञासवः अधिगच्छन्तु । सत्यमेव श्रद्धास्पदम् । क्रैस्तवमतम् इस्लाममतं च इदमेव समर्थयतः । सत्यं पुनर्विजयताम् । सत्याग्रहस्य शास्त्रीयप्रयोगवर्णनमेव मम उद्देश्यम् । मदीयख्यातिलोभस्तावल्लेशतोऽपि मे नास्ति । अन्यैरपि एवं वर्तितव्यम् । अत्र इदमेव पुनः स्मारयामि श्रीसूरदाससुभाषितम् —

क्व मत्समः कुटिलखलाभिखो भवेत् । तनुप्रदं परिजहदुन्नतो जनः ।
तं धर्मं मे सहधर्मचारिणी अपि अनुतस्थे । तदेव तस्याः बलम् ।

अलमेतावता उपोद्घातेन ।

।। इति प्रथमं दृश्यम् ।।

**।। द्वितीयं दृश्यम् ।।**

***(दक्षिणाफ्रिका-डरबननगरम् । कस्यचन वैद्यस्य गृहम्)***

**गान्धी** – (कस्तूरिबामहाशयां स्कन्दालम्बितां कृत्वा नयन्प्रविशति, पश्चात्तस्य पुत्रः मणिलालः अनुगच्छति) अये मित्र ! भिषग्वर ! इयं मे पत्नी कस्तूरिबा अस्वस्था जाता ।

वैद्यः — धीरो भव । अहं चिकित्सां करवाणि ।

गान्धी — भिषग्वर ! इयम् अत्रागमनानन्तरं त्रिवारमस्वस्था जाता, त्रिवारमपि सा गृहौषधैरेव स्वस्था अभवत् ।

वैद्यः – कदा ?

व्रताभिरक्षा हि सतामलङ्क्रिया (Protecting the accepted vows is the ornament of nobleminded.)





गान्धी — प्रथमवारं सत्याग्रह आरभमाण आसीत् । तदानीमयं मे पुत्रः मणिलालः सेवामकरोत् ।

मणिलालः गान्धिनः पुत्रः – गृहे आर्द्रकमरीचिकादिकट्वौषधैरेव स्वयं रोगाद्विमुक्ता ।

वैद्यः – (साश्चर्यम्) एवं किमाधुनिकाः गुलिका न भुक्ताः ?

गान्धी — नैव । तत्र मदकारि वस्तु भवतीति सा जानाति ।

मणिलालः — जीवने मद्यं मांसं वा न खाद्यम् इति तातः सर्वदा उपदिशति ।

वैद्यः — एवम्, आश्चर्यं जायते, अस्माकं ते विना दिनमेव यापयितुं न पार्यते कथमिदं सम्भवति ?

गान्धी - अहिंसापरमः धर्मः इति विश्वसम्मतः सिद्धान्तः अस्माभिरनुष्ठीयते । तदेव बलम् ।

मणिलालः — एवमेव न, मधु अपि कदापि न सेव्यते ।

वैद्यः — कथं चिकित्सासमये अपि मधु न सेव्यते ?

गान्धी — चाहापानमपि अस्माभिर्वर्जनीयम् ।

वैद्यः – चाहापाने को दोषः ?

गान्धी — चाहापानमपि मदं जनयति ।

मणिलालः — प्राणाः निर्गच्छन्तु नाम चाहापानं वा अन्यमादकद्रव्यं वा कदापि न सेव्यते ।

गान्धी — इदं मे मतम् । तदेव अनुतिष्ठेद् भार्याऽपि इति मदाग्रहः ।

कस्तूरिबा — (असह्यवेदनां नाटयन्ती) हा हताऽस्ति मन्दभाग्या अनामयः बहु बाधते । नाहं सहेय । (छीत्कारं करोति)

***(अत्रान्तरे गान्धिनः द्वितीयपुत्रः रामदासः प्रविश्य स्यूतिकातः शारिबाद्यसवं चषके स्थापयन्)***

रामदासः — अम्ब ! इदं गृहौषधं सेवस्व । ***(पाययितुं प्रयतते)***

वैद्यः — *(प्रतिषेधं कुर्वन्)* नानेन प्रयोजनम्, अहं रोगनिदानं पश्यामि ।

रामदासः – कथं पश्यसि ?

वैद्यः — अनेन मापकेन । *(इति हृदयस्पन्दनमापकेन परीक्ष्य)* अहो देहे रक्तमेव स्वल्पम् । चर्माच्छादितानि अस्थीनि एव दृश्यन्ते । शरीरे मांसलेशोऽपि नास्ति ।

गान्धी — किं कुर्यांः ?

वैद्यः — *(निपुणं विमृश्य)* रोगः जीर्णतां गतः । गुलिकाभिरपि निवारयितुं न शक्यते ।



रामदासः — *(ससम्भ्रमम्)* माता मे दुर्बला जाता चलितुमपि न समर्था ।

मणिलालः — भोः तात वैद्य ! कथमपि मातरं प्राणान्तकाद् व्याधेः विमोचय ।

गान्धी — किं कर्तव्यं विचिन्त्यताम् ।

वैद्यः — *(निपुणः परिशील्य)* शस्त्रचिकित्सया रोगकणाः निर्मूलनीयाः ।

गान्धी — *(जनान्तिकम्)* अयि वैद्यसहोदर ! शस्त्रचिकित्सायां मादकद्रवप्रयोगः न करणीयः । इयं प्रतिज्ञा कार्या ।

वैद्यः — यथासम्भवं प्रयतिष्ये ।

गान्धी — दीयतां मे प्रतिश्रयः ।

वैद्यः — *(स्वगतम्)* कीदृशोऽयं दृढाग्रही । किमिदं सम्भवम् ? *(जनान्तिकम्)* सा यदङ्गीकरोति तत्करवाणि ।

गान्धी — कदापि नाहमङ्गीकरोमि । कस्तूरिबायाः यद्यभिमतं,नास्ति निर्बन्धः ।

वैद्यः — *(स्वगतम्)* कीदृशी हृदयविशालता गान्धिनः ! *(जनान्तिकम्)* अस्ति तथैव प्रतिशृणोमि । (इति हस्ते हस्तं विधाय प्रतिवचनं दत्तवान्)

गान्धी — *(स्वगतम्)* अस्तु, दक्षिणाफ्रिकादेशस्य स्वातन्त्र्यसंग्रामे सत्याग्रहाय जान्सबर्गनगरं साधयामि । *(प्रकाशम्)* अयि ! मणिलाल ! त्वरतां यात्रायै ।

मणिलालः — यदाज्ञापयति पिता । मातुः सेवाम् ?

गान्धी — रामदासः अनुपश्यति ।

***(इत्युक्त्वा मणिलालेन सह निष्क्रान्तः)***

धात्री — *(वीक्ष्य)* रक्तवस्त्रो भूयो बोभूयते । तस्य अवरोधः कर्तव्यः । भवतु पट्टिकया बध्नामि । *(इति तथा करोति)*

वैद्यपत्नी — अरे रे ! शनैः शनैः मुखे पाण्डिमा जायते । किं कर्तव्यताविमूढा अस्मि । *(इति चिन्तां नाटयन्ती)* अस्तु, आर्यपुत्रं भिषग्वरं समाह्वयामि । *(इति ध्वनियन्त्रद्वारा सन्दिशति)*

रामदासः — *(दृष्ट्वा)* अहो ! भिषग्वरः समायातः ।

वैद्यः — किं जातम् ?

धात्री — रक्तधारा परिस्रवति ।

वैद्यः — *(निपुणं परीक्ष्य)* सद्यः बीर् नामकं मद्यं सेवनीयमनया ।

वैद्यपत्नी — अस्ति शीतलपेटिकायाम् । आनयामि । *(इति गच्छति अत्रान्तरे मणिलालेन सह गान्धी प्रविशति)*

मणिलालः — तात ! प्रत्यासन्नं वैद्यगृहम् ।

गान्धी — अस्तु पश्येम कस्तूरिबाम् ।

**सत्यधर्माभिरक्तानां नास्ति मृत्युकृतं भयम् ।**
**(One who is committed to the path of truth and righteousness is forever free from the fear of death)**




वैद्यपत्नी — *(बीर् मद्येन सह प्रविश्य चषके प्रपूर्य)* आर्य ! इदं मद्यम् ।
वैद्य: — मद्यं पायय ।
वैद्यपत्नी — भगिनि ! पिब । *(इति पाययितुमुपक्रान्ता)*
गान्धी — *(सोद्वेगम्)* मा .... मा..... मा.... पायय मद्यम् । *(इति चषकं निवारयति)*
वैद्य: — *(सक्रोधम्)* मद्येन विना कथं स्वास्थ्यं भवति । मांसम् अपि खादेत् कस्तूरिबा ।
गान्धी — *(सरोषम्)* नाहमनुमन्ये ।
वैद्य: — वैद्यस्य मे औषधप्रदाने आहारप्रदाने रोगिण: रोगिबन्धूनां वा अनुमति: नापेक्ष्यते ।
गान्धी — मम अनुमति: नास्ति, यदि कस्तूरिबा अनुमन्यते नास्ति मे प्रतिबन्ध: ।
वैद्यपत्नी — *(स्वगतम्)* अहो ! तपस्विन: गान्धिमहाशयस्य व्यक्तिस्वातन्त्र्ये आस्था !
धात्री — इदमेव अस्य महानुभावस्य गुणगरिमा ।
वैद्य: — यदि मांसं वा मद्यं वा खादितुं पातुं वा नानुमन्यते, तस्या: प्राणा: निर्गच्छन्ति ।
गान्धी — एवं सति कस्तूरिबाया: प्राणा: निर्गच्छन्तु नाम । स्वास्थाय नाहमनुम्ये मद्यमांसनिषेवणम् । इत: निर्गच्छामि ।
वैद्य: — एवं ते यद्रोचते तद्विधीयताम् । *(इति वेगेन निष्क्रान्त:)*
वैद्यपत्नी – *(गान्धिनं प्रति)* कठोरनिर्णयं मा स्वीकुरु ।
गान्धी — जातौ ! किं करवाव ?
रामदासमणिलालौ — कदापि माता मद्यमांसौ न सेवितवती ।
गान्धी — तर्हि मणिलाल ! त्रिचक्रिका आनीयताम् ।
मणिलाल: — यदादिशति तात: ।
गान्धी — फीनिक्सनगरं गन्तव्यम् । रामदास ! तत्र परिचितानां कृते वार्ता प्रेष्यताम् ।
रामदास: — यथा ज्ञापयति ।
गान्धी — एवमेव उष्णजलं दुग्धं च मातरं पापय ।
रामदास: — तथा करोमि । *(इति तथा करोति)*
वैद्यपत्नी — जलं दुग्धं च स्वीकुरु । *(इति कूपिकाद्वयं ददाति)* । कस्तूरिके ! तव पत्यु: दृढनिश्चय: तव सङ्कल्पश्च भवतीं रक्षतु । *(इत्युक्त्वा धात्र्या निष्क्रान्ता)*
मणिलाल: — *(प्रविश्य)* त्रिचक्रिका सम्प्राप्ता ।
गान्धी — तर्हि जातौ ! मातरं त्रिचक्रिकां प्रापयतम् ।
उभौ — तथैव । *(इति सर्वे निष्क्रान्ता:)*
गान्धी — मानवजन्म दुर्लभम्, मांसभक्षणेन शरीरमिदं न मलिनीकृतं भवत्या । तद्विनाऽपि पूर्णरूपेण स्वस्था सञ्जाता । तदेव बलम् । सङ्कल्पबलम् । तदेव बलं सर्वेषाम् आदर्शभूतमित्यहं भावयामि ।

।। शिवम् ।।

वाग्वर्धिनीपरिषद: संयोजका: डा.मुरलीधरराव-डा.सोमनाथदाश-महाभागा:, सहसंयोजका: डा.सीहेच्.नागराजुमहोदया: गान्धिन: जीवनचरित्रं दर्शनं चाश्रित्य आयोजितचर्चासत्रकार्यक्रमं सांस्कृतशैक्षिककार्यक्रमान्तरं च समचालयन्। विद्यापीठस्य कुलपतिसमेता: सर्वेऽपि कर्मचारिण: अधिकारिण: अध्यापका: छात्राश्च अन्ते शपथाम् अङ्गचकुर्वन्।

## शोधच्छात्राय अन्ताराष्ट्रियपुरस्कार:

नवम्बरमासस्य, २४ दिनाङ्के पश्चिमबङ्गराज्ये प्रवृत्तायामन्ताराष्ट्रियपुरस्कारसभायां राष्ट्रियसंस्कृतविद्यापीठस्य साहित्यशोधच्छात्र: **किरणभट्ट:** "**पद्मभूषणाचार्यशिवपूजनसहायस्मृतिसाहित्यप्रतिभा**" इति अन्ताराष्ट्रियपुरस्कारं प्राप्तवान् । एष: पुरस्कार: राष्ट्रचतुष्टयेन (भारतम्, अमेरिका, नेदरलैण्ड, ऑफ्रिका इति) मिलित्वा दीयते । श्रीभट्टेन प्राप्तस्वर्णपदकानि, सामाजिकोत्तरदायित्वम्, क्रियमाणं कार्यम्, SVBC "संस्कृतम् नेर्चुकुन्दम्" इति कार्यक्रमं च अभिलक्ष्य पुरस्कारमिदं प्रदत्तमस्ति ।







# द्विदिवसीयविमर्शनवैदग्ध्यविकासप्रशिक्षणकार्यक्रम:

## THE 2 DAY TRAINING PROGRAMME ON DEVELOPMENT OF COUNSELLING SKILLS

**25th & 26th August, 2018**




परामर्शमनोविज्ञानं जीवन-जीविकाभ्यां सम्बद्धमेकं विशिष्टं घटकं भवति; यत् परामर्शप्रक्रियया परिणाम:, पर्यवेक्षणम्, प्रशिक्षणम्, जीवनविकास:, स्वास्थ्यम्, वृत्ति: इत्यादिषु बहुषु व्यापकक्षेत्रेषु उपयुज्यते । अनेन व्यक्ते: मानसिकस्थितिं ज्ञात्वा तस्य अननुकूलविषयाणां परिशीलनं क्रियते, तथा तेषां समाधानार्थमुपाया: निष्कास्यन्ते । व्यक्ते: व्यक्तिगतसमस्यानां समाधानार्थं तस्य व्यक्तित्वविकासार्थञ्च सहाय:, मार्गदर्शनं च परामर्शपदेनोच्यते । एवं सति विद्यापीठे अधीयानानां छात्राणाम्, अध्यापनरतानामध्यापकानां कर्मचारिणाञ्च मनस्ततत्त्वदृष्ट्या परामर्शप्रावीण्यसम्पादनार्थं द्विदिवसीयप्रशिक्षणकार्यक्रम: 25-26/08/2018 दिनाङ्कयो: **RSV** (Rashtriya Sanskrit Vidyapeetha, Tirupati) तथा **IPPSI** (Inspire Professional Psychologists Society of India) इति संस्थयो: संयुक्ताध्वर्यवे महता वैभवेन परिपालित: । कार्यक्रमेऽस्मिन् समुद्घाटनसमारोहे उपस्थितानां सर्वेषां मनस्तत्त्वविदां समूहे मुख्यातिथिरूपेण समागता: तिरुपतिनगरस्य आरक्ष्यधीक्षका: (Superintendent of Police) **अभिषेकमहान्तिमहोदया:** समस्याबहुले साम्प्रतिकसमाजे उद्विग्नतापीडितानां कृते परामर्शप्रावीण्यं सर्वेषां मनस्तत्त्वविदां स्यादिति समुदबोधयन् । स्वावलम्बनशीलता, धैर्यम्, भावपूर्णा अवाप्ति:, विजय: इत्यादि विषयानादृत्य चर्चां विधाय श्रीमहान्तिमहोदया: विजयलक्ष्यं पुरस्कृत्य धैर्येण सह भावावेगं वशीकृत्य कार्येषु प्रवृत्ति: स्यादिति परामर्शसारं समुपास्थापयन् ।

मान्या: कुलपतय: आचार्य वि.मुरलीधरशर्ममहोदया: शैक्षिकभार: विद्यालयेषु महाविद्यालयेषु पीडादायको न स्यात्, शिक्षानुष्ठानेषु पाठ्यक्रम: व्यक्तित्वविकासाय भवेत् इति प्रबोध्य विद्यापीठेनायोजितस्यास्य कार्यक्रमस्य बहुधा प्रशंसामकुर्वन् ।

कार्यक्रमस्योद्देश्यं प्रतिपादयता IPPSI (Inspire Professional Psychologist Society of India) इति संस्थाया: व्यवस्थापकाध्यक्षेण **आचार्य बि.गोविन्दरेड्डीमहदोयेन** प्रामुख्येनायं कार्यक्रम: सामाजिकसमस्या-पारिवारिक-आत्महत्या-सुरापानसङ्घर्षादीनां निराकरणार्थं मनस्तत्त्वविदां परामर्शदक्षताविवर्धनार्थमेवेति उक्तम् । IPPSI सचिवा: आचार्य भारतीमहाभागा: सभारम्भे सर्वेषां स्वागतमकुर्वन्, अनुपमामहागाश्चान्ते धन्यवादान् समार्पयन् । प्रशिक्षणपरामर्शदातृषु हैदराबादनगरस्थ **आचार्यनिरञ्जनरेड्डी**, सेलमनगरस्थ: **आचार्य कदिरवन्** तथा विशाखपत्तनत: आचार्य **प्रज्ञामित्र:** इत्यादय: प्रमुखा आसन् । सम्पूर्णकार्यक्रमस्य सञ्चालका: कार्यक्रमसंयोजका: शिक्षाविभागाध्यपका: **डा.रा.चन्द्रशेखरमहोदया:** आसन् ।



# वार्तावलिः

*As it Happens,*
*Be the First One to know...*

# वार्तावलिः

# विद्यापीठं प्रति वृत्तपत्रस्पन्दः


*During April-November, 2018*

## MESSAGE OF GRATITUTDE



*On behalf of University family, I express my earnest gratitude to the members of electronic, print and web media for extensive coverage of Vidyapeetha activities in promoting and propogation of Sanskrit in particular and all round development of University in general. I expect that this relation go a long way in bringing Academic excellence of University.*

***Prof. V.Muralidhara Sharma***
*Vice-Chancellor*




## तेलुगुदिवसः (TELUGU DAY)

18-8-2018 दिनाङ्के तेलुगुभाषादिनोत्सवं पुरस्कृत्य अन्नमाचार्य-साहित्यकलापरिषदा विशिष्टः कार्यक्रमः आयोजितः। कार्यक्रमस्यास्य मुख्यातिथित्वेन प्रमुखाः साहितीवेत्तारः श्रीसमुद्राललक्ष्मणय्य महाशयाः समागत्य छात्रान् उदबोधयन्। कार्यक्रमस्य अङ्गत्वेन अधोदत्तेषु अंशेषु छात्राणां निबन्धलेखनस्पर्धाः समायोजिताः।

प्राक्शास्त्रिस्तरे - तेलुगुभाषायाः इतिहासः
शास्त्रिस्तरे - तेलुगुभाषायां पाश्चात्त्यपण्डितानां योगदानम्
आचार्यस्तरे - तेलुगुभाषायां गिडुगु राममूर्ति महाशयस्य योगदानम्
तेलुगुभाषानभिज्ञानां कृते - भवताम् इष्टानां तेलुगुकवीनां नामानि



## विद्यापीठे शल्यान्तर्वेधनदिवसः (SURGICAL STRIKE DAY)

29.09.2016 तमे दिनाङ्के पाकिस्तानाधिकृतकश्मीरभूखण्डे (PoK) त्रिंशदधिकाः शस्त्रधारिणःभारतीयसैनिकाः पञ्चत्रिंशत्सहस्राधिकोच्चगगनतलात् अवतरणच्छत्रिकया पाकिस्तानशत्रुसैन्यबहुले घनपर्वतप्रदेशे अवतीर्य आतङ्कवादस्य प्रमुखकेन्द्रस्थलानां विध्वसनं विधाय देशस्येतिहासे स्मरणीयाः समभूवन् । एतेषां वीरभटानां दुःसाहसकार्यप्रणालीं स्मारयितुं भारतस्य विविधानुष्ठानेषु शल्यान्तर्वेधन-दिवसत्वेन परिपालनार्थं सितम्बरमासस्य ऊनत्रिंशत्तमदिनाङ्कः भारतीयसर्वकारेण उदघोष्यत । सन्दर्भेऽस्मिन् मानवसंसाधनविकासमन्त्रालयस्य लिखितनिदेशानुसारेण विद्यापीठेनानेन 29.09.2018 तमो दिनाङ्कः शल्यान्तर्वेधनदिवसोत्सवरूपेण भारतीयसैन्यवाहिन्याः पराक्रमपर्व-संस्मरणपूर्वकं महताऽऽडम्बरेण पर्यपाल्यत । विद्यापीठस्य राष्ट्रियसेवायोजना-कक्षपक्षतः अवसरेऽस्मिन् विद्यापीठच्छात्र-कर्मचारि-अध्यापक-अधिकारिणामेका पदशोभायात्रा समानुष्ठीयत ।



## जागरूकतावचेतनासप्ताहमहोत्सवः
## VIGILANCE AWARENESS WEEK CELEBRATION



भारतसर्वकारनिदेशानुसारेण विद्यापीठप्राङ्गणे जागरूकतावचेतनासप्ताहमहोत्सवः 29.10.2018 दिनाङ्कात् 03.11.2018 दिनाङ्कं यावत् साडम्बरं पर्यपाल्यत । सन्दर्भेऽस्मिन् छात्रेषु भाषण-वादविवादस्पर्धाः, राष्ट्रियसङ्गोष्ठ्यादि नैके कार्यक्रमाः समचाल्यन्त । "Eradication of corruption and constructing new age India" इति वादविवादस्य विषय आसीत् । कार्यक्रमस्योद्घाटनसत्रे विद्यापीठस्य कुलसचिवाः आचार्याः जि.यस्.आर्.कृष्णमूर्त्तिमहोदयाः समुपस्थाय "वसुधैव कुटुम्बकम्" इति सूक्तितत्त्वं विमृशन्तः सर्वैः समभावापन्नमनसा परस्परं मिलित्वा देशस्य हिताय कार्यं करणीयम्, कार्येषु सर्वेषां नैतिकता स्यादिति सभास्थलम् समुदबोधयन्त । सप्ताहव्यापिकार्यक्रमस्य संयोजकाः **आचार्य राधाकान्तठाकुरमहोदयाः** विद्यापीठस्य सर्वैः छात्रैः, कर्मचारैः, अध्यापकैः, अधिकारिभिश्च सह शपथपाठमकुर्वन् ।

## विद्यापीठप्राङ्गणे श्रीजगन्नाथरथयात्रा
## CAR-FESTIVAL OF LORD SRIJAGANNATH IN VIDYAPEETHA

प्रतिसंवत्सरम् आषाढमास-शुक्लपक्ष-द्वितीयातिथौ ओडिशाराज्यस्य सुप्रसिद्धे पुरीक्षेत्रे शङ्खक्षेत्रे पुरुषोत्तमक्षेत्रे वा श्रीजगन्नाथमहाप्रभोः रथयात्रा गुण्डिचायात्रा वा महता वैभवेन परिपाल्यते । तदवसरे देशविदेशेषु निर्मितेषु सर्वेषु जगन्नाथमन्दिरेष्वपि उत्सवस्यास्य परिपालनं तद्भक्तगणैरवश्यं क्रियते । महतः सौभाग्यस्य विषयोऽयं यत् नियतपवित्रिते विद्यापीठप्राङ्गणे योगमन्दिरे प्रतिष्ठापिते उत्कलपीठे विद्यमानानां श्रीजगन्नाथ-बलभद्र-सुभद्रा-सुदर्शनाख्यानां चतुर्धामूर्त्तीनां रथयात्रामहोत्सवः १४.०७.२०१८ दिनाङ्के अन्ताराष्ट्रियश्रीकृष्णचेतनासंघस्य मिलितसहयोगेन समायोजि । विविध-वैदिकघोषैः मन्त्रैः नानावस्त्रालङ्कारविभूषितानां विग्रहाणां मन्दिरान्तः-सिंहासनात् आनीय रथोपरि संस्थापनमक्रियत । पुरीनगरे विग्रहाणामानयम् "पहण्डिविजे" इति कथ्यते । ततः यथा पुरीनगरस्य गजपतिमहाराजः स्वर्णमार्जन्या रथपरिष्करणं करोति, तथैव विद्यापीठस्य प्रमुखाधिकारिणः कुलपतयः रथमार्जनमकुर्वन् । एवं रथस्य शोभायात्रा तिरुपतिनगरे राजमार्गे आयोजिताऽभवत् । शोभायात्रायां विद्यापीठस्य कुलपतयः, कुलसचिवाः, अधिकारिणः, अध्यापकाः, कर्मचारिणः, तेलुगुदेशम् दलस्य प्रमुखनेतारः वुक्कविजयकुमारमहोदयाः, ISKCON संस्थायाः जनसम्पर्काधिकारिणः लीलापारायणदासमहाभागाः, तिरुपतिनगरवासिनः शताधिकाश्च जनाः सोत्साहं भागमगृह्णन् ।







## स्वामिशिवानन्दच्छात्रवृत्तिः - २०१७
## SHIVANANDA MEMORIAL SCHOLARSHIP-2017

प्रतिवर्षमिव ऐषमोऽपि The Devine Life Society, Rishikesh, Haridwar इति संस्थया स्वामिश्रीशिवानन्द-सरस्वतीमहोदयानां स्मृतौ आचार्यप्रथम-द्वितीयवर्षयोः साहित्य-व्याकरण-वेदभाष्य-अद्वैतवेदान्त-विशिष्टाद्वैतवेदान्त-द्वैतवेदान्त-पुराणेतिहास-न्याय-मीमांसा-धर्मशास्त्रेषु वार्षिकपरीक्षायां सर्वोच्चाङ्कान् लब्ध्वा उत्तीर्णानां छात्राणां कृते "**स्वामिशिवानन्दच्छात्रवृत्तिः**" स्वामिपादानां जन्मदिवससन्दर्भे ०८.०९.२०१८ तमे दिनाङ्के आयोजिते महोत्सवे प्रदत्ताऽऽसीत् । अष्टादशसंख्याकाः छात्राः अनया छात्रवृत्त्या (५०००/- रूप्यकैः) पुरस्कृता अभवन् । सर्वोच्चाङ्कान् लब्धवन्तः छात्राः —

**आचार्यप्रथमवर्षम्**

| क्र.सं. | नाम | विभागः | प्राप्ताङ्कः/पूर्णाङ्कः |
|---|---|---|---|
| १) | हेमसागरप्रधानः | साहित्यम् | ८१४/१००० |
| २) | श्रीतेजानन्दनम् | व्याकरणम् | ८२२/१००० |
| ३) | सी.महेशः | अद्वैतवेदान्तः | ८१८/१००० |
| ४) | चन्दनरथः | विशिष्टाद्वैतवेदान्तः | ७३३/१००० |
| ५) | बी.गिरीशकुमारः | द्वैतवेदान्तः | ८७३/१००० |
| ६) | सोमेशकुमारः | वेदभाष्यम् | ७७२/१००० |
| ७) | पबित्रभुयाँ | मीमांसा | ६५३/१००० |
| ८) | राजश्रीनायकः | धर्मशास्त्रम् | ६९७/१००० |
| ९) | सुचिस्मितापण्डा | पुराणेतिहासः | ७७८/१००० |
| १०) | एस्.अभिख्या | न्यायः | ७६३/१००० |

**आचार्यद्वितीयवर्षम्**

| क्र.सं. | नाम | विभागः | प्राप्ताङ्कः/पूर्णाङ्कः |
|---|---|---|---|
| १) | मुष्टिस्वातिकल्याणी | साहित्यम् | १६५१/२००० |
| २) | नीलेशगुप्ता | व्याकरणम् | १५९५/२००० |
| ३) | एस्.पी.तेजस्वी | अद्वैतवेदान्तः | १८०४/२००० |
| ४) | सत्यव्रतसाहु | विशिष्टाद्वैतवेदान्तः | १६१५/२००० |
| ५) | निरञ्जनपुरोहितः | वेदभाष्यम् | १६१८/२००० |
| ६) | अमरेशरथः | धर्मशास्त्रम् | १६२८/२००० |
| ७) | दीपककुमारदाशः | पुराणेतिहासः | १६७५/२००० |
| ८) | के.एस्.आर्.चक्रवर्ती | न्यायः | १५७३/२००० |

डॉ.मुरलीधरराव - डॉ.सोमनाथदाश - डॉ.सिहेच्.नागराजुमहोदयानां वाग्वर्धिनीपरिषत्संयोजकानां संयोजनया समनुष्ठितेऽस्मिन् कार्यक्रमे मान्याः कुलपतयः आचार्य वि.मुरलीधरशर्ममहोदयाः स्वीयकरकमलाभ्यां सर्वेभ्यः छात्रवृत्तिभाग्भ्यः धनराशिं प्रमाणपत्रं च प्रायच्छन् । सभायां सङ्कायप्रमुखाः आचार्य आर्.एल्.एन्.शास्त्रिमहाभागाः, छात्रवृत्तिसमितिसदस्याः आचार्य जे.रामकृष्ण-आचार्य सिहेच्.पि. सत्यनारायण-डॉ.गणपतिभट्टप्रमुखाः उपस्थिता आसन् ।



# संयुक्तप्रवेशपरीक्षा - २०१८
## COMBINED ENTRANCE TEST (CET) - 2018



तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठ-नवदेहलीस्थश्रीलालबहादूरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठ-राष्ट्रियसंस्कृत-संस्थानपरिसरेषु शिक्षाशास्त्रि-शिक्षाचार्य-विद्यावारिधिकक्षासु प्रवेशार्थं तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठेनानेन 20.05.2018 तमे दिनाङ्के भारतस्य षोडशराज्येषु केन्द्रशासितप्रदेशेषु च संयुक्तप्रवेशपरीक्षाः समायोज्यन्त । विविधराज्यानां विंशतिसंख्याकेषु नगरेषु षड्विंशतिः परीक्षाकेन्द्राणि निर्धारितान्यासन् । शिक्षाशास्त्रिप्रवेशपरीक्षायां 5612 छात्राः, शिक्षाचार्ये 115 छात्राः, विद्यावारिधिकक्षायां प्रवेशार्थं च 981 छात्राः परीक्षां व्यलिखन् । अस्याः परीक्षायाः परिणामः विद्यापीठस्य मान्यैः कुलपतिभिः 18.06.2018 तमे दिनाङ्के समुदघोषि । परिणामोद्घोषणसमये श्रीलालबहादूरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य प्रमुखाः आचार्याः के.भारतभूषणमहोदयाः, राष्ट्रियसंस्कृतसंस्थानस्य उपपरीक्षानियन्त्रकाः के.मधुकेश्वरभट्टमहोदयाः, प्रवेशपरीक्षायाः अतिरिक्तसंयोजकाः डॉ.राधागोविन्दत्रिपाठि-डॉ.ए.सच्चिदानन्दमूर्त्तिमहाभागाश्च समुपस्थिता आसन् । परीक्षासु शिक्षाशास्त्रे २२१२ छात्राः, शिक्षाचार्ये ५४ छात्राः, विद्यावारिधिकक्षायां च १५२ छात्राः उत्तीर्णा अभूवन् ।

# अध्यापनप्रविधौ अङ्कीयस्पृष्टजवनिका
## DIGITAL TOUCH SCREEN IN TEACHING METHOD

तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठमिदं यान्त्रिकनवकल्पनासन्दर्भे वर्तमानकुलपतीनां नेतृत्वे अध्ययन-अध्यापनविधीनां विकासाय सततं यतमानं दृश्यते । विद्यापीठस्य शैक्षिकभवनेषु वैद्युतककक्षाणां निर्माणेन सह तत्र तत्र आधुनिकगणकयन्त्रीयोपकरणानामपि उपयोगाय प्रशिक्षणानि प्रदीयन्ते । एवं शिक्षाशास्त्रविभागे अध्यापनप्रविधौ अङ्कीयस्पृष्टजवनिका (Digital Touch Screen) इति यान्त्रिकलेखनपट्टिकायाः कार्यशैलीं प्रशिक्षयितुं २४.०४.२०१८ तमे दिनाङ्के कार्यशालैका समायोजिताऽऽसीत् । कार्यशालायामस्यां श्रीदीपकमहोदयाः NEWLINE Technologies, Chennai इति संस्थायाः यन्त्रिणः प्रायोगिकप्रक्रियया यन्त्रस्योपयोगसन्दर्भे प्राबोधयन् । यन्त्रेऽस्मिन् अङ्गुलीमाध्यमेन श्यामपट्टिकायां सुधाखण्डेन लेखनवत् लेखितुमवकाशो वर्तते, तेन सह अन्तर्जालपरिक्रमा, चित्रोत्तलनम्, गणयन्त्र-चलदूरवाण्यादीनां संयोजनं कृत्वा दृश्य-श्रव्योपकरणानां प्रदर्शनं कर्तुं बहवोऽवकाशाः सन्ति । कार्यक्रमस्य संयोजकाः डॉ.मुरलीधररावमहाभागाः आसन् । विद्यापीठस्य अध्यापकाः अध्यापिकाः सर्वेऽपि भागग्रहणं कृत्वा कार्यक्रमं सफलमकुर्वन् ।



नानाश्रान्ताय श्रीरस्ति । (One who works hard can obtain wealth.)



# राष्ट्रियसंस्कृतलेखनानुवादकार्यशाला
## NATIONAL WORKSHOP ON COMPOSITION & TRANSLATION IN SANSKRIT



सुरवाणीं जनवाणीं कर्तुं, शास्त्रीयां संस्कृतभाषां दैनन्दिनव्यवहारोपयोगिनीं च विधातुं भारतीयसंस्कृति-संस्कृतानुरागि राष्ट्रियसंस्कृतविद्यापीठं चिरात् प्रयततेतमाम् । अमुष्मिन्नेव क्रमे प्राचीनभाषात्वेन प्राचीनव्यवहार-प्रतिबिम्बिकात्वेन च प्रथितायाः देवगिरायाः ऐदंयुगीनीकरणस्यावश्यकतामनु बोभूयमानमदो विद्यापीठं संस्कृतभाषया आधुनिकं मौलिकवाङ्मयं स्रष्टुं, विधि-प्रविधि-विज्ञान-चिकित्सा-सङ्गणक-साहित्यशास्त्राणि च संस्कृते अनुवदितुं शोधच्छात्राणां सम्प्रेरणायै २३.०४.२००१८ दिनाङ्कात् २७.०४.२०१८ दिनाङ्कं यावत् मान्यकुलपतीनां प्रो.वि.मुरलीधरशर्मणाम् आदेशेन पञ्चदिनात्मिकां राष्ट्रियां लेखनानुवादकार्यशालां समायोजयत् । कार्यशालायाः समुद्घाटनसमारोहे मध्यप्रदेशस्य सतानगरस्थप्राच्यविद्या-शोधसंस्थानस्य देववाणीवितानस्य निदेशकाः राष्ट्रपतिपुरस्कारभाजः डॉ.सुद्युम्नाचार्याः, मुख्यातिथिपदं तथा च विद्यापीठस्य कुलपतयः आचार्याः मुरलीधरशर्माणः आध्यक्ष्यमलमकुर्वन् ।

कार्यशालाया अस्याः प्रमुखान्युद्देश्यान्यासन् —

१) विविधप्रान्तीयभाषाभ्यः संस्कृतभाषायामनुवादसामर्थ्यविकसनम् ।

२) विकि-स्रोतसि विद्यमानानां विषयाणां सरल-सुबोध्यसंस्कृतभाषाद्वारा अनुवादं कृत्वा संस्कृतस्य ऐदंयुगीनीकरणम् ।

३) दुर्लभसंस्कृतग्रन्थानां भाषान्तरैः अनुवादं कृत्वा संस्कृतस्य सार्वभौमिकत्वसम्पादनम् ।

४) छात्राणाम्, अनुसन्धित्सूनां, पाठकानां च विविधज्ञानविज्ञानप्रबोधन-कौशलविकसनम् ।

५) संस्कृतभाषायाः प्रचारः प्रसारश्चेति ।

एतदर्थं कार्यशालायां नवदेहली-शृङ्गेरी-वाङ्गालोर-तिरुपतिनगरेभ्यः समागतेषु छात्रेषु चिताः ७५ शोधच्छात्राः भागमूढ्वा बहून् दुर्लभ-दुर्बोध्यग्रन्थान् तथा च विक्रिस्रोतसि विद्यमानान् भाषान्तरलिखितान् पाठान् अन्ववदन् । अनुवादकौशलविकासार्थं **प्रो.सुद्युम्न आचार्यः, प्रो.सुदर्शनशर्मा, प्रो.जि.एस्.आर्.कृष्णमूर्त्तिः, प्रो.जे.रामकृष्णः, प्रो.राणीसदाशिवमूर्त्तिः** (साहित्याकादम्या अनुवादपुरस्कारभाक्) इत्येतादृशाः बहवः पण्डिताः समागत्य प्रतिदिनं प्रायशः १५ घण्टापरिमितं कालं छात्रान् उदबोधयन् । **डॉ.उदयनहेगडे, डॉ.नन्दनभट्टश्च** अनुवादकार्यक्रमस्य अभ्याससत्राणि सुचारु समचालयन् ।

कार्यशालायाः समापनसमारोहे (२७.०४.२०१८) नवदेहलीस्थ-विश्वविद्यालयानुदानायोगस्य संयुक्तसचिवाः **डॉ.अर्चनाठाकुरमहाभागाः** मुख्यातिथित्वेन समागत्य विद्यापीठस्य संस्कृतं प्रतियोगदानं बहुधा प्राशंसन् । ताभिरुक्तं –

"Though the Vidyapeetha is having traditional bent by its wide Academic activities, it is a "Vibrant University". While looking into recent development, the University is striving hard to reckon Sanskrit as a language of masses. Vidyapeetha is imparting Sanskrit at free of cost for the benefit of common people is noteworthy by telecasting the programme "Samskrutam Nerchukuntam" through Sri Venkateswar Bhakti Channel (SVBC). And this University is marching towards development under the able leadership of the Vice-Chancellor Professor Muralidhar Sharma. The UGC will support all endeavors for promotion of Sanskrit language and its quality."

कार्यशालायाः सञ्चालकाः **प्रो.कोराड सूर्यनारायणमहाभागाः**, अतिरिक्तसञ्चालकाः **डॉ.के.कादम्बिनी-डॉ.यशस्विमहोदयाश्च** आसन् ।



विद्या शौर्यं च दाक्ष्यं च बलं धैर्यं च पञ्चमम् । मित्राणि सहजान्याहुः .. ।। (शुक्रनीतिः - ४/१३)
(Learning, Valour, Skill, Strength and fortitude are said to be five natural friends.)

# राज्यस्तरीयशास्त्रीयस्पर्धा:

# STATE LEVEL SHASTRIC COMPETITIONS



महानयं प्रमोदस्य विषयो यत् ऐषमोऽपि राष्ट्रियसंस्कृतसंस्थानपक्षत: समायोजयिष्यमाणाया: ५७ तम्या: अखिलभारतीयशास्त्रीयस्पर्धाया: कृते भागजिघृक्षूणाम् आन्ध्र-तेलेङ्गाणराज्ययो: विविधानुष्ठानेषु अधीयानानां संस्कृतच्छात्राणां प्रतिभापरीक्षणपूर्वकं चयनार्थं राज्यस्तरीयशास्त्रीयस्पर्धा: विद्यापीठप्राङ्गणे वाग्वर्धिनीपरिषदा 02.11.2018 दिनाङ्कात् 03.11.2018 दिनाङ्कं यावत् यथाविधि समायोजिता आसन् । कार्यक्रमेऽस्मिन् उभयराज्ययो: प्रायश: द्वादशसंस्कृतानुष्ठानेभ्य: निमन्त्रिता: छात्रा: समुदायतया २६ स्पर्धासु भागं गृहीत्वा स्वीयप्रतिभां प्रादर्शयन् ।

स्पर्धाया: समुद्घाटनसमारोह: ०२.११.२०१८ तमे दिनाङ्के प्रात: १०.०० वादने शैक्षिकभवनस्य आचार्यरमारञ्जनमुखर्जिसभाङ्गणे समायोजि। सन्दर्भेऽस्मिन् वेमुलवाडस्थ-श्रीराजराजेश्वरीकलाशालाया: निवृत्तप्रांशुपाला: आन्ध्रसंस्कृतावधानिन: **आचार्या: श्रीहरिशर्ममहाभागा:** सारस्वतातिथित्वेन, राष्ट्रियसंस्कृतविद्यापीठस्य कुलसचिवा: **आचार्या: जि.एस्.आर्.कृष्ण-मूर्त्तिमहोदया:** समुद्घाटकत्वेन तथा च विद्यापीठस्य शैक्षिकसङ्कायप्रमुखा: आचार्या: आर्.एल्.एन्.शास्त्रिमहाभागा: अध्यक्षत्वेन समुपस्थाय छात्रान् प्राबोधयन् । सभेयं प्रदीपप्रज्वालनेन सह वैदिकमङ्गलाचरणेन प्रारब्धाऽभूत् । सारस्वतातिथयस्तेषां भाषणे संस्कृत-तेलुगु-अवधानयो: तेलुगुभाषावधानापेक्षया संस्कृतावधानं सरलं, अपि च सर्वासु भाषासु अद्यापि संस्कृतभाषाया: प्राचुर्यं दरीदृश्यते इति प्रबोध्य संस्कृतभाषा न मृतभाषाऽपि तु अमृतभाषा इति उदबोधयन् । सभासमुद्घाटका: मान्या: कुलसचिवा: तेषां समुद्घाटनभाषणे स्पर्धालूनां मार्गदर्शनं कृत्वा **"स्पर्धया वर्धते विद्या"** इति वाक्यस्य तत्त्वांशं प्राबोधयन् । शैक्षिकसङ्कायप्रमुखा: **आचार्य आर्.एल्.एन्.शास्त्रिमहोदया:** श्रीहरिशर्ममहोदयानाम् अवधानकौशलं प्रशंस्य अवधानिन: बुद्धिचातुर्यं सोदाहरणं प्रत्यपादयन् । समुद्घाटनसमारोहस्य सञ्चालका: परिषत्संयोजका: डॉ.यस्.मुरलीधरराव-महोदया आसन् । अतिरिक्तसंयोजका: डॉ.सोमनाथदाशमहोदया: तथा डॉ.सिहेच्.नागराजु-महोदया: क्रमश: अतिथीनां स्वागतम्, धन्यवादसमर्पणञ्च अकुर्वन् ।


समुद्घाटनसत्रसमन्तरमेव विद्यापीठस्य आचार्यरमारञ्जनमुखर्जि-सभाङ्गणे तथा च Career Counselling Cell प्रकोष्ठे विविधा: स्पर्धा: समचाल्यन्त । स्पर्धासु न्यायनिर्णायकत्वेन हैदराबादनगरात् निवृत्ताचार्या: **आचार्यश्रीपादसुब्रह्मण्यमहोदया:**, वाङ्गालोरनगरात् निवृत्तप्राध्यापका: **आचार्यसूर्यनारायणभट्टमहाशया:**, आचार्यश्रीहरिशर्ममहोदया:, राष्ट्रियसंस्कृतविद्यापीठस्य वेदान्तविभागाचार्या: **आचार्य एम्.एल्.एन्.मूर्त्तिमहाभागा:**, व्याकरणाचार्या: **आचार्य जे.रामकृष्ण -महोदया:**, ज्योतिषविभागाचार्या: आचार्या: **श्रीपादभट्टमहोदया:**, निवृत्तसाहित्याचार्या: आचार्या: **कोम्पेल्लरामसूर्यनारायण**महोदया: तथा च श्रीवेङ्कटेश्वरवैदिक-विश्वविद्यालयस्य अनुसन्धानप्रकाशनविभागनिदेशका: **डॉ.राधेश्याम-महोदया:** समागच्छन् ।

दिनद्वयं यावत् सञ्चालितेऽस्मिन् कार्यक्रमे भागग्रहीतृणाम्, समायोजकानाम्, कार्यकर्तृणां च कृते विद्यापीठस्य अतिथिगृहे भोजनावासव्यवस्था पर्यकल्प्यत। विद्यापीठात् तथा बहिर्विश्वविद्यालय-महाविद्यालय-कलाशालाभ्य: समागता: सर्वेऽपि छात्रा:, पण्डिता: विद्यापीठस्य शोभनवातावरणे शास्त्रचर्चायां भागमूढ्वा आनन्दिता अभूवन् ।









स्पर्धया वर्धते ज्ञानम् । (Knowledge is increased through Competition)



कार्यक्रमस्य स्वस्तिवाचनिकमहोत्सव: 03.11.2018 तमे दिनाङ्के सायं पञ्चवादने आचार्यरमारञ्जनमुखर्जिसभाङ्गणे मान्यकुलसचिवानाम् **आचार्य जि.एस्.आर्.कृष्णमूर्त्ति**महोदयानामाध्यक्ष्ये समानुष्ठीयत । कार्यक्रमेऽस्मिन् विद्यापीठस्य मान्या: कुलपतय: **आचार्या: वि.मुरलीधरशर्म**महोदया: मुख्यातिथिपदं **श्रीमन्त: हिल्लल्लिसूर्यनारायणभट्ट**महाभागाश्च सारस्वतातिथिपदमलङ्कृत्य विविधस्पर्धासु भागग्रहणावसरे छात्राणामवधानं भाषा-शैली-विषयेषु कथं स्यादित्यस्मिन् प्रसङ्गे प्राबोधयन् । सभारम्भे वाग्वर्धिनी-परिषद: सहसंयोजका: डॉ.सिहेच्.नागराजुमहोदया: अतिथीनां स्वागतं व्याहरन्, संयोजका: डॉ.यस्.मुरलीधररावमहोदयाश्च कार्यक्रमविवरणं प्रास्तुवन् । कुलपतिसमेता: अतिथय: विजेतॄणां कृते पारितोषिकधनराशिना सह प्रमाणपत्राणि प्रायच्छन् । अन्ते च सभामर्यादापुरस्सरं कुलपतिभि: अतिथीनाम्, न्यायनिर्णायकानां तथा च विविधानुष्ठानेभ्य: समागतानां स्पर्धालुमार्गदर्शकानां राङ्कवस्त्रफलदानपूर्वकं सम्माननं व्यदधु: । परिषद: संयोजका: डॉ.सोमनाथदाशमहोदया: सम्पूर्णकार्यक्रमं समचालयन् ।

आगामिनि जनवरीमासे षष्ठदिनाङ्कात् नवमदिनाङ्कं यावत् राष्ट्रियसंस्कृत-संस्थानपक्षत: अगरतालानगरे तत्परिसरे सञ्चालयिष्यमाणासु स्पर्धासु भागग्रहणार्थं चिता:छात्रा: —

| | |
|---|---|
| व्याकरणभाषणम् | श्रीतेजानन्दनम् |
| साहित्यभाषणम् | के.जमाल: |
| न्यायभाषणम् | यस्.अभिख्या |
| सांख्ययोगभाषणम् | रश्मिजेना |
| मीमांसाभाषणम् | सिद्धार्थशङ्करपण्डा |
| वेदान्तभाषणम् | |
| धर्मशास्त्रभाषणम् | टि.गङ्गाधरशर्मा |
| ज्योतिषभाषणम् | पि.एस्.अङ्गद: |
| जैनबौद्धदर्शनभाषणम् | सञ्जयकुमाररथ: |
| वेदभाष्यभाषणम् | कुमुदपाढी |
| साहित्यशलाका | चित्तरञ्जनगिरि: |
| व्याकरणशलाका | स्वातीईश्वरलोडे |
| न्यायशलाका | - |
| ज्योतिषशलाका | टि.बि.के.बालहनुमान् |
| वेदान्तशलाका | - |
| पुराणेतिहासशलाका | प्रकाश आचार्य: |
| मीमांसाशलाका | ऋषीकेशविडवई |
| शास्त्रार्थविचार: | जयप्रकाश आचार्य:, हरिपदवेरा |
| काव्यकण्ठपाठ: | एम्.श्यामलिका |
| अमरकोषकण्ठपाठ: | शिवानी शर्मा |
| अष्टाध्यायिकण्ठपाठ: | मैत्रेयी आर्य: |
| धातुरूपकण्ठपाठ: | टि.हरिप्रिया |
| भगवद्गीताकण्ठपाठ: | उमामहेश्वर: |
| अक्षरश्लोकी | प्रभाशर्मा |
| शास्त्रीयस्फूर्तिस्पर्धा | पवित्रकुमारनन्द:, अरविन्दनायक: |



नास्ति विद्यासमं चक्षु: (There is no sight such as knowledge)

## राष्ट्रियार्हतापरीक्षा (National Eligibility Test)


Biplab Paul,
sankya yoga, NET


Harish Chandra Barman,
avidaita vedentaNET


Ranjan Dutta,
sahitya, NET


Sadhuram Sahu
Sahitya, NET


Sonali Saha,
Vyakaran, NET



**Soma Mondal**
A.Vedenta, NET

उपरि निर्दिष्टा: विद्यापीठस्य प्रतिभासम्पन्ना: छात्रा: राष्ट्रियार्हतापरीक्षायां समुत्तीर्णा: विद्योतन्ते । तेभ्य: विद्यापीठपक्षत: हार्दानि अभिनन्दनानि ।

## राष्ट्रियैकतादिवस:, मौलाना अबुल् कलाम आजादजन्मदिवसोत्सव:

### NATIONAL UNIT DAY (31st October - 2018)
### BIRTH ANIVERSARY OF MAULANA ABUL KALAM AZAD










विविधतासु एकता (Unity in Diversiy) अस्माकं भारतीयसंविधानस्य मूलमन्त्रोऽस्ति । जाति-धर्म-वर्णनिर्विशेषेण सर्वेऽपि वयं भारतीया: एकस्मिन् एकतासूत्रे सूत्रे मणिगणा इव गुम्फिता: वर्तामहे । सर्दारवल्लभभाईपटेलमहोदयानां जन्मवार्षिकमहोत्सवं पुरस्कृत्य भारतसर्वकारेण अक्टोवरमासस्य एकत्रिंशत्तमदिनाङ्क: "एकतादिवस"रूपेण परिपालयितुं निरदिशत् । तदनुगुणं विद्यापीठेनानेन राष्ट्रियैकता-शुद्धता-निरापत्तासम्पादनार्थं दिवसोत्सवोऽयं महता वैभवेन पर्यपाल्यत । कार्यक्रमाङ्गतया विद्यापीठशैक्षिकसङ्कायप्रमुखै: आचार्य आर्.एल्.एन्.शास्त्रिमहोदयै: समेता: सर्वेऽपि छात्रा:, कर्मचारिण:, अधिकारिणश्च प्रतिश्रुतिपाठमकुर्वन् । अवसरेऽस्मिन् वाग्वर्धिनीपरिषत्पक्षत: मौलाना अबुल् कलाम आजाद महोदयानां भारतस्य प्रतिष्ठायै शिक्षाया: विकासार्थं च योगदानं पुरस्कृत्य राष्ट्रियचर्चासत्रमेकमपि समायोजि । सत्रेऽस्मिन् मुख्यातिथय: विद्यापीठस्य प्राक्तनकुलसचिव-कुलपतिपदविभूषिता: आचार्या: श्रीपादसत्यनारायणमूर्त्तिमहाभागा: स्वीयप्रबोधने मौलाना अबुल कालाम आजादमहोदयानां जीवनचरित्रं पुरस्कृत्य, तेषां शिक्षाक्षेत्रे योगदानमभिलक्ष्य बहुधा अवर्णयन् । आचार्य सुनीतिकुमारचटर्जिमहोदयानाम् आध्यक्ष्ये १९५६ तमे संवत्सरे संस्कृतस्य विकासाय संघटितस्य संस्कृतायोगस्य कृते तेषां आजादमहोदयानां तात्कालिकाभिरुचिसन्दर्भेऽपि बहव: विषया: मुख्यातिथिवर्यै: उपास्थाप्यन्त । चर्चासत्रस्य सारस्वतातिथय: भूतपूर्वकुलपतय: आचार्य एम्.एल्.एन्.मूर्त्तिमहोदया:, कुलसचिवा: आचार्य जि.यस्.आर्.कृष्णमूर्त्तिमहोदयाश्च आसन् । संगोष्ठ्यामस्यां प्रायश: त्रिंशदधिका: भागग्राहिण: मौलानाचरित्रमाश्रित्य, तेषां भारतीयसंस्कृतिं, शिक्षां प्रति च योगदानमाश्रित्य नैकानि शोधपत्राणि प्रास्तुवन् । कार्यक्रमस्य सञ्चालका: वाग्वर्धिनीपरिषद: संयोजका: डॉ.मुरलीधरराव:, डॉ.सोमनाथदाश:, डॉ.सिहेच्.नागराजु च आसन् ।
















## अन्ताराष्ट्रिययोगदिवसोत्सव:
### INTERNATIONAL YOGA-DAY CELEBRATION




विद्यापीठस्य योगचिकित्साकेन्द्रेण राष्ट्रियसेवायोजना-समित्या च २१.०६.२०१८ तमे दिनाङ्के प्रात: सप्तवादनात् प्रारभ्य अपराह्णे एकवादनं यावत् मान्यकुलपतीनां तत्त्वावधानेन अन्ताराष्ट्रिययोगदिवसोत्सव: यथाविधि पर्यपाल्यत । कार्यक्रमारम्भ: महर्षिपतञ्जले: विग्रहपूजनपूर्वक-पुष्पमालासमर्पणेन समभूत् । तत: विद्यापीठस्यान्तर्दौवारिकक्रीडाङ्गणे छात्रा:, कर्मचारिण:, अध्यापका:, अधिकारिण: तथा च योगचिकित्साशिबिरभागग्राहिण: सर्वेऽपि योगाभ्यासमकुर्वन् । विद्यापीठपरिसरात् तिरुपतिनगरे सन्दर्भेऽस्मिन् पदशोभायात्राऽपि समायोजि । एकादशवादनत: सार्धद्वादशवादनपर्यन्तं समायोजितायां योगसम्बोधनसभायाम् अध्यक्षा: विद्यापीठस्य मान्या: कुलपतय: आचार्य वि.मुरलीधर- शर्ममहोदया: महर्षिपतञ्जले: त्रिसहस्रवर्षेभ्य: पूर्वं विश्वस्य कृते प्रदत्तां ज्ञानविभूतिं संस्मरन्त: वर्तमानकाले योगं विना स्वास्थ्यसम्पादनं दु:साध्यमिति प्राबोधयन् । विद्यापीठे 2018-19 शैक्षिकवर्षेऽस्मिन् B.Sc. (Yoga), M.Sc. (Yoga Therapy) इति नियमितपाठ्यक्रमस्य व्यवस्थीकरणेन ते आत्मतुष्टिं प्रादर्शयन् । उत्सवेऽस्मिन् श्री एन्.मुक्तेश्वररावमहोदया: तिरुमलतिरुपतिदेवस्थानस्य विशिष्टप्रकल्पाधि-कारिण: मुख्यातिथिपदं व्यभूषयन्त । सम्पूर्ण: कार्यक्रम: योगचिकित्सा-केन्द्रस्य निदेशका: डॉ.राजेन्द्ररेड्डिमहोदया: संमायोज्यन्त । उत्सवसन्दर्भे तै: संयोजकै: चत्वारिंशद्दिवसानां योगप्रशिक्षणशिबिरमेकं चालितं, यस्य मुख्यान्युद्देश्यान्यासन् — उच्चरक्तचापनिर्मूलनम् (Eradication of Hy-pertension), पृष्ठपीडा (Backache), मधुमेहनिर्मूलनम् (Eradica-tion of Diabetes) च । कार्यक्रमे तात्कालिककुलसचिवा: आचार्य सिहेच्.पि.सत्यनारायणमहोदया:, सर्वेऽपि राष्ट्रियसेवायोजनासमितिसदस्या:, सर्वेऽपि कर्मचारिण:, अध्यापका;, छात्राश्च समुपस्थिता: कार्यक्रममिमं सफल्यकुर्वन् ।

## स्वच्छभारतं तथा पादपपर्व
### FRESH INDIA AND GREENERY FESTIVAL
"हरीतिम्न: मातृगृहं विद्यापीठम्"

राष्ट्रियसंस्कृतविद्यापीठस्य राष्ट्रियसेवायोजनाया: (N.S.S.) आध्वर्यवे 07-07-2018 तमे दिनाङ्के स्वच्छभारतं तथा पादपपर्व (सस्यारोपणं सस्यपरिरक्षणं च) इत्ययं कार्यक्रम: छात्राणां समधिकोत्साहेन प्रवृत्त: । कार्यक्रमस्यास्य मुख्यातिथित्वेन उपस्थिता: विद्यापीठस्य मान्या: कुलपतय: आचार्य.वि.मुरलीधरशर्ममहाभागा: छात्रान् उद्दिश्य अवदन् यत् "विद्यापीठप्राङ्गणस्य हरितमयत्वसम्पादने छात्राणां श्रम: अविस्मरणीय: । विगतवर्षे पादपपर्वकार्यक्रमस्य अङ्गत्वेन आरोपितानि सस्यानि भृशं प्रवृद्धानि । विद्यापीठस्य प्राङ्गणं दृष्ट्वा तिरुपतिवासिनो जना: **हरीतिम्न: मातृगृहं विद्यापीठम्** इति प्रशंसाम् अकुर्वन् इति इदमेव निदर्शनमत्र । ये सस्यानि आरोपयन्ति ते भवगवत्सेवका: भवन्ति" इति । अयं कार्यक्रम: प्रात: ६.३० वादनत: रात्रौ ९.३० वादनपर्यन्तं निरन्तरं प्राचलत् । अस्मिन् कार्यक्रमे विद्यापीठस्य राष्ट्रियसेवायोजनाया: सप्तविभागीया: द्विशताधिका: छात्रा: अत्यन्तमुत्साहेन भागमगृह्णन् । राष्ट्रियसेवायोजनाया: समायोजकानां डा.यस्.दक्षिणामूर्तिमहाशयानां नेतृत्वे प्रचालिते अस्मिन् कार्यक्रमे अधिकारिण: डा.बलिचक्रवर्ति:, डा.लतामङ्गेश्, डा.भारतभूषणरथ:, डा.ए.सुनीता, डा.सच्चिदानन्दमूर्ति:, डा.गिरिकुमार:, रविनायुडु च आसन् ।





# श्रीमद्रामानुजाचार्यसाहित्यप्रकाशनप्रकल्पः
## PROJECT FOR PUBLISHING OF THE LITERATURE RELATED TO SAINT SRIMAD RAMANUJACHARYA



श्रीविशिष्टाद्वैतसिद्धान्तप्रवर्तकाचार्याणां जगद्गुरूणां भगवद् रामानुजाचार्याणां सहस्राब्दिमोत्सवपुण्यस्मृतिमुपलक्ष्य तिरुपतिराष्ट्रियसंस्कृतविद्यापीठस्य मान्यकुलाधिपतीनां पद्मभूषणानां श्री एन्.गोपालस्वामिवर्याणां विशेषप्रयत्नेन भारतसर्वकारसंस्कृति-मन्त्रालयपक्षतः अस्मद् विद्यापीठस्य कृते **अष्टादशलक्षाधिकैककोटिपरिमितधनराशिः** सम्प्राप्तो विद्यते । अयमेकः सुवर्णावसरः अस्मद्विद्यापीठस्य कृते । यतो हि एतावान् धनराशिः न कस्यचित् संस्कृतानुष्ठानस्य कृते प्रदत्तोऽस्ति ।

एतं सन्दर्भं सफलयितुकामाः विद्यापीठस्य मान्याः कुलपतयः आचार्य वि.मुरलीधरशर्माणः समितिमेकां सङ्घटय्य तद्द्वारा भगवद्रामानुसम्बद्ध-तालपत्रनिबद्धग्रन्थप्रकाशनाय बद्धदीक्षाः अभूवन् । तत्फलतया परियोजनानाः निदेशकरूपेण बहुशास्त्रपारङ्गताः आचार्य के.ई.देवनाथन् महोदयाः नियुक्ताः । तेषां साहाय्यार्थं साहित्यविभागाचार्याः तथा सहाचार्याः आचार्य चक्रवर्तिरङ्गनाथन् तथा डा.भारतभूषणरथमहोदयाः संयोजकरूपेण चिताः सन्ति । अस्याः परियोजनायाः लक्ष्यमित्थं भवति -


१) अष्टादशमासेषु द्वादशमातृकाणां सम्पादनं परिष्करणं प्रकाशनञ्च ।

२) एतद्ग्रन्थसम्पादनपरिष्करण-पादटिप्पण्यादिलेखनाय द्वादशाधिक-विदुषां समाह्वानं नियुक्तिश्च ।

३) एतावत्पर्यन्तमप्रकाशितानां रामानुजसम्बद्धग्रन्थानां लोकार्पणम् ।

४) प्रायः विंशतिसहस्राधिकतन्त्रपुटानां प्रकाशनम् ।

५) एतेन जगद्गुरूणां भगवद्रामानुजाचार्याणां गौरवप्रदानं तथा च अस्मद्विद्यापीठस्य गौरवसम्पादनम् ।



# विद्यापीठकर्मचारिणामध्यापकानां वृत्तिस्थायित्वम्
## JOB - CONFORMATION OF VIDYAPEETHA STAFFS AND TEACHERS

विद्यापीठेऽस्मिन् कर्मतत्पराणां कर्मचारिणाम् अध्यापकानां च नियुक्त्यनन्तरं परिवीक्षाकालः (Probation Period) कश्चन भवति । तदभ्यन्तरे तेषां कर्मकुशलतां ज्ञात्वा विद्यापीठाधिकारिभिः वृत्तिस्थायित्वपत्रं प्रदीयते । सौभाग्यमस्माकं यत् २००२ संवत्सरात् प्रारभ्येदानीं यावत् प्रायशः एकनवतिसंख्याकानां कर्मचारिसमेताध्यापकानां कृते तेषां विकासमूलककार्याणां पर्यवेक्षणं कृत्वा वृत्तिस्थायित्वपत्रं प्रियतमकुलपतिभिः पद्मभूषणश्रीरमारञ्जनमुखर्जिसभाङ्गणे समायोजिते एकस्मिन् विशिष्टोत्सवे प्रदत्तम् । अनेन सर्वेऽप्यध्यापकाः कर्मचारिणः हर्षोल्लासैः कुलपतिभ्यः धन्यवादानाविरकुर्वन् ।

**यो नो द्वेषत्पृथिवी यः पृतन्याद्यो भिदासान्मनसा यो वधेन । तं नो भूमे रन्ध्य पूर्वकृत्वरि ।** (May this Earth so charged with positive force, neutralise that element which impels ill-will, aggressive intention, subjugation of human beings and their elimination)



# विविधपरिषदां शैक्षिककार्यक्रमाः
## LITERARY AND CULTURAL ACTIVITIES OF DIFFERENT PARISHAD



अस्य शैक्षणिकवर्षस्यारम्भे समायोजिते विविधपरिषदामुद्घाटनमहोत्सवे भाषमाणाः मान्याः कुलपतयः ; मञ्चासीनाः मुख्यातिथयः श्रीवेङ्कटेश्वरवैदिकविश्वविद्यालयस्य अनुसन्धानप्रकाशनविभागस्य निदेशकाः **डॉ.राधेश्याममहोदयाः**, सङ्कायप्रमुखाः आचार्य आर्.एल्.एन्.शास्त्रिवर्याः, डॉ.मुरलीधरराव-आचार्य वी.सुजाता–डॉ.लतामङ्गेश-डॉ.वै.विजयलक्ष्मीप्रमुखाः वाग्वर्धिनी-मैक्समूलर्-तुलसीदास-अन्नमाचार्याकलापरिषत्संयोजकाः

# तुलसीदासपरिषत्कार्यक्रमाः

अस्माकं भारतवर्षस्य राष्ट्रभाषा हिन्दी वर्तते । अस्याः भाषायाः प्रचारप्रसारार्थं विद्यापिठीयच्छात्राणां हिन्दीभाषायां विविधकौशलविकासाय एषा तुलसीदासपरिषत् प्रतिष्ठापिता विद्यते । अस्मिन् शैक्षिकवर्षे अस्याः परिषदः उद्घाटनं **03.08.2018** दिनाङ्के अभूत् । अगष्टमासात् अक्टोबरमासं यावत् अस्याः परिषदः चत्वारः समावेशाः सम्पन्नाः । अस्यां परिषदि भाषणप्रतियोगिताः, निबन्धलेखनप्रतियोगिताः, आशुभाषणप्रतियोगिताश्च समायोजिताः सन्ति । विविधप्रतियोगितासु न्यायनिर्णेतृरूपेण हिन्दीविभागीयाः तदितरविभागीयाश्च अध्यापकाः समाहूताः, पुरस्कारभाग्भ्यः छात्रेभ्यः पुरस्काराश्च प्रदत्ताः । अनया परिषदा **14.09.2018** तमे दिनाङ्के हिन्दीदिवसमुपलक्ष्य मान्यकुलपतीनाम् आचार्य वि.मुरलीधरशर्ममहोदयानाम् आध्यक्ष्ये एका विशिष्टा सभा समचाल्यत, तथा च छात्राणाम्, कर्मचारिणाम्, अध्यापकानाञ्च प्रातिभप्रदर्शनार्थं विविधाः स्पर्धा अपि समायोज्यन्त ।

# अभिमन्युबालकेन्द्रवार्ता:

संस्कृतस्य सार्वजनीनभाषात्वेन प्रचाराय प्रसाराय च संस्थापितेन विद्यापीठस्य अभिमन्युबालकेन्द्रेण प्रतिमासं तिरुपतिस्थविविधशिक्षानुष्ठानेषु षट्त्रिंशत् (36) बालकेन्द्राणि समचाल्यन्त । एतेषु केन्द्रेषु प्रायशः 1000 छात्राः अध्ययनरताः सन्ति । मासस्य अन्तिमेषु दशादिनेषु सरलसंस्कृतसम्भाषणकौशलविकासार्थं विद्यापीठस्य प्रशिक्षिताः छात्राः अनुभवसम्पन्नाः अध्यापकाः तत्र सरलसंस्कृतपाठने भागमगृह्णन् । केन्द्रपक्षतः अक्टोबरमासे भगवद्गीताप्रशिक्षणमपि प्रदत्तमासीत् । प्रतिरविवासरं पत्राचारमाध्यमेन प्रायशः षष्ट्यधिकाः नागरिकाः बहिःस्थाः जनाश्च प्रशिक्षणं प्राप्नुवन्ति । जुलैमासात् नवम्बरमासं यावत् प्रायशः २५ संस्कृतसम्भाषण-शिबिराणि समायोजितानि । केन्द्रस्य सुचारुसञ्चालयनं किरणभट्टः (शिक्षकः), परमेश्वरः (संयोजकः) इत्यनयोः सहयोगेन क्रियते ।



**उदीरणा उतासीनास्तिष्ठन्तः प्रक्रामन्त । पद्भ्यां दक्षिणसव्याभ्यां मा व्यथिष्महि भूम्याम् । (In daily life, on Earth, Whether we are sitting, standing, or in motion, may our activity be such as would never cause injury or grief.)**

## अन्नमाचार्यसाहित्यकलापरिषदः कार्यकलापाः
## ACTIVITIES OF ANNAMACHARYA KALAPARISHAD

राष्ट्रियसंस्कृतविद्यापीठस्य तेलुगुविभागेन सञ्चाल्यमानायाः अन्नमाचार्यसाहित्यकलापरिषदः पक्षतः अस्यैव शैक्षिकवर्षस्य नवम्बरमासं यावत् त्रीणि अधिवेशनानि सञ्चालितानि । छात्राणां भाषणपटुत्वं निबन्धलेखनकौशलं च संवर्धयितुम् आयोजितासु स्पर्धासु विद्यापीठस्य तेलुगुच्छात्राः तदितरच्छात्राश्च सोत्साहं भागम् अगृह्णन् । प्रत्यधिवेशनं स्पर्धासु चर्चिताः विषयाः अधोदत्ताः आसन् ।

| प्रथमाधिवेशनम् (११-८-२०१८) भाषणस्पर्धा | द्वितीयाधिवेशनम् (०८-९-२०१८) भाषणस्पर्धा | तृतीयाधिवेशनम् (१५-९-२०१८) निबन्धलेखनस्पर्धा |
|---|---|---|
| प्राक्शास्त्रिस्तरे - समाजः - छात्राणां पात्रता | भवताम् इष्टः तेलुगुकविः | वेमनशतकम् |
| शास्त्रिस्तरे - आधुनिकसमाजे प्राविधिकपरिज्ञानस्य प्रभावः | शिवकवयः | सुमतीशतकम् |
| आचार्यस्तरे - भारतीयाचारसम्प्रदायाः | प्रबन्धकवयः | भर्तृहरिसुभाषितत्रिशति |
| तेलुगुभाषानभिज्ञानां कृते - स्वीयपरिचयः | भवताम् इष्टं पर्वदिनम् | भवताम् इष्टं पर्वदिनम् |

## शैक्षिक-शिक्षणेतरकर्मचारिणां पदोन्नतिः
## PROMOTIONS OF TEACHING AND NON-TEACHING STAFF

विद्यापीठे कार्यरतानां त्रिंशत्संख्याकानां शैक्षिक-शिक्षणेतरकर्मचारिणां पदोन्नतिः मान्यकुलपतीनां कुलसचिवानाञ्च तत्त्वावधानेन यथाविधि अक्रियत । तेषां सूची यथा —

**ASSOCIATE PROFESSOR TO PROFESSOR**

1) Dr.Chakravarthy Raghavan
2) Dr.S.R.Saranya Kumar
3) Dr.C.Ranganathan
4) Dr.K.Rajagopalan
5) Dr.K.Ganapati Bhat
6) Dr.G.Sreedhar

**ASSISTANT PROFESSOR TO ASSOCIATE PROFESSOR**

1) Dr.K.Kadambini
2) Dr.V.Ramesh Babu
3) Dr.Radhagovinda Tripathi
4) Dr.S.Dakshinamurthy Sarma
5) Dr.S.Muralidhar Rao

**ASSISTANT PROFESSOR STATE - II TO STAGE - III**

1) Dr.K.Viswanatha
2) Dr.R.Chandrasekhar
3) Dr.Narayan

**ASSISTANT PROFESSOR STAGE - I TO STAGE - II**

1) Dr.N.R.Ranganath Tatacharya
2) Dr.T.Latha Mangesh
3) Dr.Sudhanshu Sekhar Mohapatra
4) Dr.Nagaraju Chandanala
5) Dr.K.Leenachandra
5) Dr. Ajmeera Chandulal
7) Dr.Gyanaranjan Panda
8) Dr.Swetapadma Satapathy
9) Dr.P.T.G.Ranga Ramanujacharyulu
10) Dr. O.G.Prasada Kalyana Sastri
11) Dr. Yashaswee
12) Dr.Santosh Majhi

**NON-TEACHING STAFF DPC PROMOTIONS**

1) Sri V.G.Sivasankara Reddy (Deputy Registrar Pay Upgradation from Level-11 to Level - 12 (Modified Level-13)
2) Dr.P.Giri Naidu (Assistant University Librarian Stage - I to Stage - II
3) Sri M.Ekambaram (Section Officer to Assistant Registrar)
4) Sri U.Sambasiva Rao (Private Secretary to As sistant Registrar)

एतेभ्यः सर्वेभ्यः विद्यापीठपक्षतः सेमुषीपरिवारपक्षतः वर्धापनानि ।





## साप्ताहिककार्यक्रमः - संस्कृतशिक्षणे नवाचाराः
## 7 DAYS PROGRAMME ON INNOVATIONS IN SANSKRIT TEACHING

विद्यापीठस्य शिक्षाविभागीयाध्यापककर्मचारिणां संस्कृताध्यापन-कौशलविकासार्थं सप्ताहव्यापी **विषयविभागविकासकार्यक्रमः** (One Week Faculty Development Programme) विश्वविद्यालयानुदानायोगस्य प्रायोजनायां २३.०७.२०१८ दिनाङ्कात् २८.०७.२०१८ दिनाङ्कं यावत् यथासङ्कल्पं शिक्षाशास्त्रविभागभवने मान्यकुलपतीनाम् आचार्य वि.मुरलीधरशर्ममहोदयानामाध्यक्ष्ये समचाल्यत । अध्यक्षाः शर्ममहोदयाः संस्कृताध्यापने भाषा-विषय-उपस्थापनाशैलीषु नवाचारस्य महत्त्वमुद्घोषयन्तः उपस्थितान् सर्वानपि भागग्रहीतॄन् नवनवोन्मेषशालिनीप्रज्ञायाः विकासार्थं कौशलानि प्रास्तुवन् । विद्यापीठस्य मान्याः कुलसचिवाः आचार्य जि.एस्.आर्.कृष्णमूर्त्तिमहोदयाः उद्घाटनसन्दर्भे कार्यक्रमस्य बीजभाषणं समुपास्थापयन् । कार्यक्रमस्य शुभारम्भः डॉ.के.कादम्बिनीमहाभागायाः मङ्गलगीतिकया तथा च आचार्य प्रह्लाद आर्.जोशीमहाभागानां स्वागतभाषणेन समभूत् । सभान्ते च प्रो.एन्.लताममहाभागाः सर्वेषां वृते कृतज्ञतानिवेदनमकार्षुः । सप्तदिनानि यावत् प्रचाल्यमानेऽस्मिन् कार्यक्रमे अधोलिखिताः विषयाः चर्चिताः । यथा —

| दिनाङ्कः | विषयः |
|---|---|
| २३.०७.२०१८ | संस्कृतभाषाशिक्षणे नव्यप्रवृत्तयः |
| २४.०७.२०१८ | संस्कृतकाव्यशिक्षणे नवाचाराः |
| २५.०७.२०१८ | संस्कृतगद्यशिक्षणे नवाचाराः |
| २६.०७.२०१८ | संस्कृतरूपकशिक्षणे नवाचाराः |
| २७.०७.२०१८ | संस्कृतशिक्षणे सूचनासञ्चारप्रौद्योगिकस्योपयोगिता |
| २८.०७.२०१८ | संस्कृतशास्त्रशिक्षणे नवचाराः |

एतेषु सर्वेष्वपि प्रशिक्षणवर्गेषु आचार्यकोम्पेल्लसूर्यनारायण-श्री.पी.-नागमुनिरेड्डी-आचार्य जि.एस्.आर्.कृष्णमूर्त्ति-आचार्य राणीसदाशिवमूर्ति-डॉ.सि.रङ्गनाथन्-श्रीसतीशप्रमुखाः आचार्याः स्वीयबहुमूल्याध्यापनेन मार्गदर्शनेन च भागग्रहीतृणां नवाचाराणां विषये सन्दर्भानुगुणं पाठयन्तः बहुधा उपकृतवन्तः ।

**समापनसमारोहः**


कार्यक्रमस्य समापनसमारोहे डॉ.एस्.दक्षिणामूर्त्तिमहाभागाः प्रार्थनागीतम्, आचार्य जि.एस्.आर्.कृष्णमूर्त्तिमहोदयाः सभाधिष्ठानदेवेभ्यः पुष्पाञ्जलिप्रदानम्, आचार्य एन्.लतामहाभागाः स्वागतभाषणमकार्षुः । सभारम्भे डॉ.आर्.चन्द्रशेखरमहोदयाः कार्यक्रमसंयोजकाः सम्पूर्णं कार्यजातं व्यवृण्वन् । समापनसमारोहस्यास्य अध्यक्षाः प्रियतमाः कुलसचिवाः कृष्णमूर्त्तिमहाभागाः सर्वेषां कृते प्रमाणपत्राणि अवितरन् । सर्वेऽपि शिक्षाशास्त्रविभागाध्यपकाः अध्यापिकाः, कर्मचारिणः, शोधच्छात्राः समुपस्थाय कार्यक्रमं सफल्यकुर्वन् ।




## विद्यापीठकर्मचारिणे Ph.D. उपाधिः



विद्यापीठस्य शिक्षणेतरकर्मचारिणः श्रीमन्तः **जम्मुलमडकवेङ्कटसुब्रह्मण्यसीतारामाञ्जनेय शर्ममहोदयाः** श्रीवेङ्कटेश्वरविश्वविद्यालये संस्कृतविभागे आचार्य हयग्रीवशर्ममहोदयानां मार्गदर्शने "**अभिनवकालिदासविरचितस्य भागवतचम्पूकाव्यस्य समीक्षात्मकम् अध्ययनम्**" इति विषयमधिकृत्य शैक्षिकवर्षेऽस्मिन् दीक्षान्तसमारोहे पिएच्.डि. उपाधिमध्यगच्छन् ।




# विद्यापीठाचार्याणां विदेशयात्रा
## FOREIGN VISIT OF VIDYAPEETHA PROFESSOR

**अमेरिकाराष्ट्रस्य कालिफोर्नियानगरे शान्फ्रन्सिस्कोमिल्पटास्मध्ये सिलिकान् आन्ध्रविश्वविद्यालयः** अस्ति । तत्र 2019, January मासादारभ्य संस्कृतविभागः उद्घाटयिष्यते । तत्र च संस्कृते Online द्वारा Diploma Course, Certificate Course च प्रारप्स्येते । पाठ्यांशानां रचनार्थं तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य साहित्यविभागाध्यक्षाः **प्रो.राणिसदाशिवमूर्त्तिमहाभागाः** आहूता इति विद्यापीठस्य गोरवावहोऽयं विषयोऽस्ति । तै अस्मिन् वर्षे 01.11.2018 दिनाङ्कात् 21.11.2018 दिनाङ्कं यावत् तत्र स्थित्वा पाठ्यांशानां रूपकल्पनमकारि । नवम्बरमासस्य अष्टमदिनाङ्के तैः "प्राचीनभारतीयविज्ञानम्" इति विषयमाधारीकृत्य व्याख्यानमेकमपि प्रास्तावि । तस्मिन्नवसरे नवम्बरमासस्य अष्टादशदिनाङ्के इमे सिलिकान् आन्ध्रविश्वविद्यालयस्याधिकारिभिः Academic Advisory Council सभ्यरूपेणापि मनोनीता अभूवन् । संस्कृतविभागस्य पाठ्यांशप्रणालीरचनाम्, अध्यापकानां मार्गदर्शनं च प्रदाय इमे बहुधा प्रशंसाभाजनानि समभवन् । ११.११.२०१ तमे दिनाङ्के तत्रैव आन्ध्रसाहित्यवेदिकायामेकस्मिन् कार्यक्रमे **"वचनकविताया: भारतीयमूलानि"** इति विषयमधिकृत्य अभाषन्त । वचनकविताया: मूलानि, लाटिन्-फ्रैञ्च-प्रभृतिभाषाभ्यः न सन्ति, अपि तु यजुर्वेद-तैत्तिरीयोपनिषदादिभ्यश्च एव प्रसृता वचनकवितेति ते सोदाहरणं न्यरूपयन् । कालिफोर्नियादेशस्थवेददेवालये १२.११.२०१८ दिनाङ्कात्








१५.११.२०१८ दिनाङ्कं यावत् कार्तिकमासवैशिष्ट्यम्, तस्मिन् मासे पूजाविधानम्, कार्तिककथा: इत्यादि प्रधानांशान् अधिकृत्य विशिष्यानि व्याख्यानानि च प्रास्तुवन् । ततः १७.११.२०१८ दिनाङ्के Tulup Schools organisation मध्ये "Role of Bhagavadgeeta in Managerial Success" इति विषये भाषणमयच्छन् । एवं देशाद्बहिर्गत्वा संस्कृतस्य विविधवैज्ञानिकभित्तिभूमीनां विषये, विशिष्टतया वेदोपनिषद्भगवद्गीतादिव्याख्यानानि प्रदाय इमे तत्र बहुधा प्रशंसिता आसन् । अस्माकं विद्यापीठमस्मिन्नवसरे तेषामेतदृशवैदुष्यपूर्णविदेशगमने सर्वदा गौरवान्वितमेव भवति ।

# विद्यापीठच्छात्रप्रतिभा
## TALLENT OF THE STUDENTS

तिरुपतिस्थ-अन्ताराष्ट्रियकृष्णचेतनासङ्घ (ISKCON) पक्षतः भारतीयसंस्कृते प्रसिद्धश्रीकृष्णजन्माष्टमी-महोत्सवसन्दर्भे विविधाः जिल्लास्तरीयवार्षिकस्पर्धाः 2018 अगष्टमासस्य, 21-25 दिनाङ्केषु समचाल्यन्त । तत्र आंग्ल-तेलुगुभाषयोः समायोजितासु भाषणस्पर्धासु, निबन्धस्पर्धायाम्, चित्राङ्कनप्रतियोगितायाञ्च भागमूढ्वा विद्यापीठस्य नव छात्राः पुरस्कारान् अध्यगच्छन् । तत्र प्रदत्ताः विषयाः "Reading & Following the Vedic Scriptures is useful for the present society or not ?", "Why only Krishna is Supreme and not others ?" इत्यादय आसन् । प्राप्तपुरस्काराः छात्राः यथा –





**विद्या वितर्को विज्ञानं स्मृतिः तत्परता क्रिया: इति षडेते असाध्यसाधकाः गुणाः ।**
**(Education, Ligic, Science, Memory, Initiation and work are six virtues for achieving anything.)**



| | |
|---|---|
| १) एस्.अभिख्या | आंग्लभाषणे प्रथमः |
| २) पि.एस्.अङ्गदः | आंग्लभाषणे तृतीयः |
| ३) वै.प्रसन्नाञ्जलिः | तेलुगुभाषणे तृतीयः |
| ४) डि.श्रीनिवासरावः | तेलुगुभाषणे सान्त्वना |
| ५) वै.मणिकण्टा | तेलुगुभाषणे सान्त्वना |
| ६) सवरी मीनाक्षी | प्राक्शास्त्रीस्तरे आंग्लभाषणे द्वितीयः |
| ७) जि.वेङ्कटेश्वरुलु | तेलुगुनिबन्धलेखने द्वितीयः |
| ८) अमरेशप्रधानः | चित्राङ्कने प्रथमः |
| ९) प्रतिभासाहुः | चित्राङ्कने सान्त्वना |













सर्वेऽपि छात्राः 4th September, 2018 तमे दिनाङ्के श्रील- प्रभुपादमहोदयानामाविर्भावदिनोत्सवे तिरुपतितिरुमल-देवस्थानस्य विशिष्टसभाप्रान्तरे श्रीकृष्णमन्दिरसमीपे पुरस्कारान् प्रमाणपत्राणि च अवाप्नुवन् । विद्यापीठपक्षतः तेभ्यः ताभ्यश्च हार्दानि शुभाभिनन्दनानि विज्ञाप्यन्ते ।

# वाग्वर्धिनीपरिषत्परिचर्या

प्रतिवर्षमिव अस्मिन्नपि शैक्षिकवर्षे छात्राणां संस्कृतभाषणकौशलविकासाय शास्त्राणां गभीराध्यनसंस्काराय च विद्यापीठस्य वाग्वर्धिनीपरिषदः समुद्घाटन-कार्यक्रमः ०३.०८.२०१८ दिनाङ्के श्रीमतां राधेश्याममहाशयानां मुख्यातिथित्वे तथा अस्माकं प्रियतमानां कुलपतीनां श्रीमतामाचार्यमुरलीधरशर्म-महोदयानामाध्यक्ष्ये सुसम्पन्नः । मङ्गलानां शतैरारब्धेयं वाग्वर्धिनीपरिषद् इयता कालेन अष्टौ अधिवेशनानि सोल्लासं सम्पूर्य अग्रेऽपि इतोऽधिकानि अधिवेशनानि सञ्चालयितुं कृतसङ्कल्पा वर्तते । पूर्वं समाप्तेषु अष्टसु अधिवेशनेषु अधोनिर्दिष्टक्रमेण स्पर्धाः समचाल्यन्त ।

| अधिवेशनम् | शास्त्रम् | दिनाङ्कः | प्राक्शास्त्रीविषयः | शास्त्री | आचार्यः (शास्त्रीयाः/सामान्याः) |
|---|---|---|---|---|---|
| प्रथमाधिवेशनम् | मङ्गलारम्भः | 07.08.2018 | स्वशास्त्रेषु मङ्गलाचरणम् | | |
| द्वितीयाधिवेशनम् | वेदभाष्यम् | 22.08.2018 | वेदानां वैशिष्ट्यम् | इष्टिविचारः (शास्त्रीयः) | वेदापौरुषेयत्वविचारः(शा) |
| | | | | ऋग्वेदवैशिष्ट्यम् (सामान्यः) | मित्रस्य चक्षुषा समीक्षामहे (सा) |
| तृतीयाधिवेशनम् | साहित्यम् | 27.08.2018 | दिलीपस्य गोभक्तिः | वाक्यं रसात्मकं काव्यम् (शा), | लक्षणा तेन षड्विधा (शा) |
| | | | | भारतीयसंस्कृतेः महनीयता (सा) | सहसा विदधीत न क्रियाम् (सा) |
| चतुर्थाधिवेशनम् | न्यायशास्त्रम् | 03.09.2018 | वृक्षो रक्षति रक्षितः | व्याप्तिलक्षणम् (शा) | हेत्वाभासप्रथमलक्षणम् (शा) |
| | | | | पर्यावरणदूषणस्य कारणानि (सा) | प्रकृतिसंरक्षणस्योपायाः (सा) |
| पञ्चमाधिवेशनम् | धर्मशास्त्रम् | 11.09.2018 | विद्या ददाति विनयम् | धर्मलक्षणम् (शा) | स्मार्तधर्माः (आचार्यशास्त्रीयः) |
| | | | | ज्ञानं तपश्च विनयान्वितमेव भाति (सा) | अनुत्सेकः खलु विक्रमालङ्कारः(सा) |
| षष्ठाधिवेशनम् | व्याकरणम् | 18.09.2018 | न हि सुप्तस्य सिंहस्य प्रविशति मुखे मृगाः | पूर्वत्रासिद्धम् (शा) | अथव्याकरणमित्यस्यशब्दस्यकः पदार्थः (शा) |
| | | | | जलाभावे जलबाहुल्ये च सृष्टिनाशः (सा) | प्राविधिकक्षेत्रे संस्कृतस्य प्रासङ्गिकता (सा) |
| सप्तमाधिवेशनम् | अद्वैतवेदान्तः | 05.12.2018 | स्वास्थ्यं सर्वार्थसाधकम् | ज्ञानकर्मसमुच्चयवादः (शा) | ब्रह्मसूत्रे प्रकृत्यधिकरणम् (शा) |
| | | | | त्रैलोक्यदीपको धर्मः (सा) | विमुद्रीकरणस्य लाभालाभविचारः(सा) |
| अष्टमाधिवेशनम् | द्वैतवेदानतः | 11.12.2018 | सत्यं ब्रूयात् प्रियं ब्रूयात् | द्वैतवेदान्ते प्रमाणविचारः (शा) | वेदापौरुषेयत्वम् (शा), |
| | | | | नारीणामधिकाराः कर्तव्यानि च (सा) | वैश्विकमानवाधिकाराः कर्तव्यानि च (सा) |


**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।**
**(Doing verily works in this world one should wish to live a hundred years.)**

# सूचनासम्प्रेषणप्रौद्योगिकसम्पत्सम्पर्कशालावार्तावली
## INFORMATION COMMUNICATION TECHNOLOGY RESOURCE CENTRE (ICTRC)

आधुनिकप्रौद्योगिकप्रणालीनां शैक्षणिक-प्रशासनिक-सांस्कृतिक-क्षेत्रेषु प्रयोगार्थं विद्यापीठे मान्यकुलपतीनां मार्गनिर्देशने प्रतिष्ठापिता सूचनासञ्चारप्रौद्योगिकसम्पत्सम्पर्कशाला बहूनि नूतनप्राविधिककार्याणि सम्पादयति । तेषु कार्यक्रमेषु छात्राणां प्रवेशसन्दर्भे, शिक्षाशास्त्र-शिक्षाचार्य-विद्यावारिधिप्रवेशपरीक्षाणामावेदनपत्रसंग्रहणप्रसङ्गे, तासां परीक्षाणां फलोद्घोणार्थम्, अङ्कीयशिक्षणनिरीक्षणार्थम् (Digital Learning Monitoring), सामाजिकप्रसारमाध्यमानां (Digital Social Media) यथा WhatsApp, Instagram, Youtube इत्यादीनामुपयोगे, संस्कृतप्रशिक्षणतन्त्रांशानां (Application Soft-wares for Sanskrit Learning) संघटनसन्दर्भे, कक्षासु छात्राणामुपस्थितिग्रहणार्थं नूतनतन्त्रांशानां (New Mobile Attendance Software Applications) निर्माणविषये, नैके प्रसिद्धाः सन्ति । Sanskrit Educationa and Research Network (SERN) इति नाम्ना संस्कृतविषयाधारितजालस्थानस्य विकासोऽपि अनेन केन्द्रेण संसाधितः । कुलपतीनां एतादृशः विचारः सर्वदा सर्वथा च प्रशंसार्ह एव भवति । ततोऽपि "**संस्कृतविकिपेडिआ**" सन्दृब्धिसन्दर्भे सम्पर्ककेन्द्रस्यास्य महद्योगदानं वर्तते । विद्यापीठस्य शोधच्छात्राः सर्वेऽपि अत्र प्रसिद्धदुर्लभग्रन्थानां संस्कृतानुवादं कुर्वन्ति । टङ्कणम्, संशोधनम्, अन्तर्जाले तेषामुपस्थापनं कृत्वा सर्वजनहिताय सर्वजनज्ञानाय च ते सर्वेऽपि ग्रन्थाः समुपस्थापयिष्यन्ते ।

## सुजलम् (200KLD Sewage Treatment Plant)

तिरुपतिनगरे विशिष्टतया विद्यापीठपरिसरे च समुत्पद्यमानां जलसमस्याम् अक्षिलक्षीकृत्य छात्रावासेषु निवसतां छात्राणाम्, कर्मरतानां कर्मचारिणाम्, अध्यापकानां च कृते पानीयजलप्रदानार्थं विद्यापीठप्राङ्गणे "**सुजलम्**" इति नाम्ना स्थापिते केन्द्रे शुद्धजलयन्त्रस्योद्घाटनं महामान्य-कुलाधिपतीनां श्री एन्. गोपालस्वामिमहाभागानां करकमलाभ्यां समभूत् । अवकाशोऽयं 14.65 लक्षपरिमितधनराशिनाऽकल्प्यत । अस्मिन् यन्त्रे एककालेन 2000 Litres परिमाणात्मकजलराशिः स्थापयितुं शक्यते । तथा च इदं प्रतिघण्टां 1000 Litres जलं वेगेन दातुं शक्नोति । विद्यापीठस्य प्रतिदिनमावश्यकीयं 7000 Ltr. जलराशिं प्रदातुं यन्त्रस्यास्य महद् योगदानं वर्तते ।




## शोधच्छात्रैः आयोजितं रक्तदानशिबिरम्
## (BLOOD DONATION CAMP BY RESEARCH SCHOLARS)





आपः पृणीत भेषजं वरूथं तन्वेऽमम, ज्योक्च सूर्यं दृशे ।
(O Water, you are abundantly filled with Medicinal Herbs; Please protect my body, so that I can see the Sun for long)



# महामहिमराष्ट्रपतीनां महर्षिबादरायणव्याससम्माननम्



**डॉ. श्रीमती के. कादम्बिनीमहाभागाः**, विद्यापीठस्य शिक्षाशास्त्रि-विभागस्य सहाचार्याः, संस्कृतसाहित्यं, शिक्षाशास्त्रम्, गणयन्त्रविज्ञानं प्रति च तासां महद्योगदानाय भारतस्य प्रतिष्ठितेन महर्षिबादरायणव्याससम्मानेन सम्माननाय ऐषमः अभिलक्षिताः वर्तन्ते । १३.११.१९७२ तमे दिनाङ्के लब्धजन्मानः इमाः श्रीमती के.एस्.लक्ष्मी-आचार्य के.वि.रामकृष्णमाचार्युलु-महोदययोः सुपुत्र्यः नव्यव्याकरणे, Natural Language Processing इति गणकविज्ञाने, सम्भाषणसंस्कृते, संस्कृतप्रविधिप्रसङ्गे च निपुणाः सन्ति । "आंग्लेय्याः संस्कृते अनुसरणप्रक्रियानिर्माणम्" इति विषयमधिकृत्य अनया कृतमनुसन्धानम् पाणिनीयव्याकरणमाश्रित्य आंग्लभाषातः संस्कृतभाषायां यान्त्रिकानुवादार्थं (Machine Translession) विशिष्टं मार्गं निर्दिशति। शिक्षाक्षेत्रे एतासां सप्तदशवर्षाणामनुभूतिः वर्तते । नैकासु सङ्गोष्ठीषु बहुमूल्य-समाजोपयोगि-अनुसन्धानमूलकपत्राणि प्रस्तूय इमाः बहुधा प्रशंसाभाजनानि सन्ति । पत्रिकासु मनोविज्ञान-विद्यालयप्रबन्धन-अनुसन्धानप्रविधि-पर्यावरण-शिक्षणसामग्रीनिर्माण-व्यक्तित्विकास-पाठ्यपुस्तकनिर्माणादिविषये एताभिः प्रकाशिताः लेखाः सर्वथा प्रशंसार्हाः भवन्ति । "सङ्गणकप्रायोगिकी", "विद्यालयप्रबन्धनम्", "आंग्लेय्याः संस्कृते अनुसरणप्रक्रियानिर्माणम्-एकमध्ययनम्" इत्यादयः एताभिः प्रकाशिताः मौलिकग्रन्थाः वर्तन्ते । शास्त्री, विद्याभूषणम्, हिन्दीप्रवेशिका, नव्यव्याकरणाचार्यम्, एम्.ए. (संस्कृतम्), शिक्षाशास्त्री, शिक्षाचार्यम्, एन्.एल्.पि., विद्यावारिधिः, P.G.Diploma in Guidance and Counselling, Diploma in Music इत्यादिषु प्राप्तसम्मानाः इमाः राष्ट्रियार्हतापरीक्षायां (NET) त्रिवारम्, राज्यस्तरीयार्हतापरीक्षायां (State Level Eligibility Test) च एकवारम् उत्तीर्णाः सन्ति । चतुर्दशवर्षाणां शैक्षिकानुभूतिभिः सह एतासां Language Technologies Research Centre, Indian Institute of Information Technology, Hyderabad, Andhra Pradesh इति संस्थायां हिन्दी-आंग्ल-अनुसारकप्रकल्पे Linux Environment मध्ये अनुसन्धात्रीरूपेणापि अनुभवः वर्तते । एतदर्थं महोदयानां प्रथममहिला-बादरायणव्याससम्मानग्रहीतृरूपेण चयने सति विद्यापीठं गौरवान्वितमस्ति ।



**डॉ. नन्दिमुरलीमहोदयाः**, विद्यापीठस्य लब्धप्रतिष्ठाः गणक-यन्त्रप्रवीणाः कर्मचारिणः, संस्कृतभाषासाहित्यं प्रति तेषां विशिष्टयोगदानाय भारतस्य महामान्यराष्ट्रपतिमहोदयानां महर्षिबादरायणव्याससम्मानाय ऐषमः मनोनीताः सन्ति । सङ्गणकयन्त्रे, अन्तर्जाले, जालस्थानेषु च तेषां गभीराध्ययनं वर्तते । नवीनप्रौद्योगिकप्रणाल्या संस्कृतभाषाशिक्षणार्थमिमे गणकतन्त्रांशानां निर्माणे सिद्धहस्ताः सन्ति । १६/०५/१९७५ तमे दिनाङ्के लब्धजन्मानः श्रीमतीकुसुमनन्दी-श्रीवेङ्कटरमणनन्दीमहोदययोः सुपुत्राः इमे सङ्गणकविज्ञाने "Under Standing of Elementary Sanskrit Text at Word, Phrase and Sentense Level" इति विषयमधिकृत्य Ph.D. तथा च "Tools for Comparative Study and Evaluation of English Parsers" इति विषये M.Phil. इति उपाधिं लब्धवन्तः । इमे राष्ट्रियसंस्कृतसंस्थानात् "विशिष्टसंस्कृतसेवाव्रती" सम्माननमपि अवाप्नुवन् । सङ्गणक-संस्कृतविषयान् अधिकृत्य बहूनामनुसन्धानमूलकशोधपत्राण्यपि एतैः प्रकाशितानि सन्ति । (1) Sandhi Synthesis, (2) Sandhi Analyzer (3) Dhaturupavali (4) Sanskrit Tutor (5) Chandovichhitti (6) Kridanta Rupamala (7) Shodasa Samskara (A Multi Media Project) useful for Functional Sanskrit Students (8) Kankana Baddha Ramayanam (9) Jyotisha Tutor (10) Panchadeva Sama Suktam (A Multi-Media project using Flash) (11) Noun Generation (12) Sanganaka Yantradvara Chandasam Shatpratyaya Gananavidhi-vinyasah (13) Identification of Samasa इत्यादिषु क्षेत्रेषु तेषामनुपम-योगदानं वर्तते । एतत्सर्वमक्षिलक्षीकृत्य भारतस्य प्रसिद्धसम्माननमिदं प्रदातुं भारतस्य महामान्यैः राष्ट्रपतिभिः इमे चिताः सन्ति ।

**संस्कृतनवरात्रमहोत्सवसन्दर्भे अनयोः सम्मानानं विधाय विद्यापीठमस्माकं गौरवविमण्डितं भवति । अवसरेऽस्मिंश्च एताभ्यां तयोः उपलब्धिमिमां पुरस्कृत्य शेमुषीपरिवारपक्षतः, विश्वविद्यालयपक्षतश्च हार्दानि अभिनन्दानि विज्ञाप्यन्ते ।**


रम्याणां विकृतिरपि श्रियं तनोति । (The difection of beautiful things manifest the beauty too.)

## विद्यापीठस्यागामिवार्ता :

(१) त्रयोदशाखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोह:
(२) द्वाविंशदीक्षान्तसमारोह: (३) विद्यापीठवार्षिकोत्सव:
(४) छात्रावासोत्सव:

इत्येतै: कार्यक्रमै: विद्यापीठमस्माकं ब्रह्मोत्सवैरिव उत्सवमुखरं भविष्यति । प्रतिवर्षमिव ऐषमोऽपि समायोजयिष्यमाणे अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहे अष्टादशसंख्याकासु शैक्षिक-सांस्कृतिकस्पर्धासु भागग्रहणार्थं त्रिशताधिकच्छात्रा: भारतस्य विविधमहाविद्यालय-विश्वविद्यालयेभ्य: समागमिष्यन्ति । सन्दर्भेऽस्मिन् विद्यापीठप्राङ्गणे संस्कृतविज्ञान-**संस्कृतिवैभवप्रदर्शिनीनां पुस्तकप्रदर्शिनीविक्रयणकेन्द्राणां** च स्थापना करिष्यते ।



## आचार्य नरसिंहाचार्य पुरोहितमहोदयेभ्य: स्वर्णकङ्कणपुरस्कार:

महत: हर्षप्रकर्षस्य विषयोऽयं यत् अस्माकं विद्यापीठस्य द्वैतवेदान्त-विभागस्य विभागाध्यक्षवर्या: आचार्य नरसिंहाचार्यपुरोहितमहाभागा: द्वैतवेदान्तसिंहासनाधिरूढै: श्रीमद्राघवेन्द्रमठीयपीठाधिपतिभि: १००८ श्री श्री सुबुधेन्द्रतीर्थश्रीपादै: श्रीमत्तात्पर्यचन्द्रिकापाठमङ्गलोत्सवसन्दर्भे अस्मिन् संवत्सरे श्रीपेजावरविश्वेशतीर्थश्रीमच्चरणानामाध्यक्ष्ये स्वर्णकङ्कणपुरस्कारेण सम्मानिता: ।

सन्दर्भेऽस्मिन् विद्यापीठपक्षत: तेभ्य: हार्दानि अभिनन्दनानि विज्ञाप्यन्ते ।


## शेमुषीपरिवार:



प्रकाशक:
आचार्य जि.एस्.आर्.कृष्णमूर्त्ति:
कुलसचिव:



सम्पादक:
आचार्य कोराड सूर्यनारायण:
विभागाध्यक्ष:, अनुसन्धानप्रकाशनविभाग:



सम्पादक:
डॉ.सोमनाथ दाश:

वार्तासङ्कलक:, रागि वेङ्कटाचारी, अतिथि-अध्यापक:

Dear Readers !
Your suggestions are solicited to improve the qaulity of our newsletter.
Please send your views or feed back to the Editors mail editorssemushi@gmail.com
Editors